Shri Raghunath Temple MSS. Library,
JAMMU

No. १५६६

Title न्यायसिद्धान्त मञ्जरी टीका

Author ×

Extent २९ Age ×

Subject न्याय शास्त्रं

न्याय सिद्धांत मंजरी टीका

१५७७

२८ पत्रे

पत्र २८

०तर्कं०
१

॥श्रीगणेशायनमः॥श्रीगुरुभ्योनमः संध्यायाः प्रणतिं हरेर्गिरिजयासेर्ष्यं समालोकिते रोषं मा निनिमा कृथाः स्वहृदये रागान्न्यासि वंद्या मम किं
तु त्वामहमानमामि मनसि ध्यात्वा तयैवाकृतीरित्थं हर्षितशैलराजतनया हृष्टः शिवः पातु नः १ सिद्धान्तगूढवर्श्मैकभावनापरिशीलिता श्रीकंठ
निर्मिता सेयं कृतिरातनुतां मुदं २ सत्येकस्मिन्व्याधिके साधकसहस्रस्याप्यकिंचित्करत्वेन प्रतिबंधकाभावस्यावश्यापेक्षिततया प्रकृतग्रंथसमा
प्तिप्रतिबंधकदुरितरूपविघ्नविघातायकृतं भगवन्नत्यात्मकं मंगलं शिष्यशिक्षार्थमादौ निबध्नाति प्रणम्येति मंगलस्य समाप्तिं प्रतिविघ्नध्वंसद्वा
रहेतुत्वमिति सिद्धान्तस्थितिः तत्रानन्यथासिद्धनियतपूर्ववर्तित्वरूपकारणत्वघटकानन्यथासिद्धत्वांशग्रहे व्यापकत्वरूपनियमां
शग्रहे वा स्वस्वव्याप्यतरयावत्कारणसत्वेऽवश्यं यत्सत्वं यदभावेऽवश्यं यदभाव इति नियमघटितयोर्नियतान्वयव्यतिरेकयोः कारणत्वेमाना
भावेऽपि अन्वयव्यतिरेकाभ्यां विशिष्टतद्रूपकारणत्वग्रहे अतिरिक्तकारणत्वग्रहे वा तयोर्हेतुतया तत्सहकृतप्रत्यक्षप्रमाणगम्यत्वस्य यद्यपिना

नियतपूर्वव
र्तित्वरूपः

त्र संभवः मंगलसत्वेऽपि समाप्त्यसत्वान्मंगलाभावेऽपि समाप्तिसत्वादन्वयव्यतिरेकव्यभिचारात् तथापि समाप्तिफलकत्वेनाद्यमेवमितिला
घवज्ञानसहकृतं शिष्टाचारविषयत्वहेतुकं सफलत्वानुमानमेवात्र मानं जन्मान्तरीयमंगलसंदेहेन व्यतिरेकव्यभिचारसंशयेऽपि ग्राह्य राम
संशयस्यानुमितिप्रतिबंधकतया समाप्तिकारणत्वेऽनुमिते समाप्तिरूपकार्येण जन्मान्तरीयमंगलानुमानान्न व्यतिरेकव्यभिचारः मं १

गलेसतिसमाप्त्यभावस्यतत्रजन्मांतरीयमंगलानाश्यविघ्नसत्वादनंतरोत्पन्नविघ्नसत्वाद्वितिनान्वयव्यभिचारोपि अतएवतत्कथामध्येपिमंगल
माचरंति एवंचाशुविनाशिनःकालांतरभाविफलजनकत्वंव्यापारंविनानुपपन्नमितिविघ्नध्वंसद्वारासमाप्तिंप्रतिमंगलंहेतुरितिसंप्र
दायः नव्यास्तु मंगलंविनापिनास्तिकादिग्रंथसमाप्तेर्नतत्रतद्धेतुः नचचरमवर्णरूपायाश्चरमवर्णध्वंसरूपायावासमाप्तेराका
शनिष्ठतयाआत्मनिष्ठस्यमंगलस्यतज्जन्यविघ्नध्वंसस्यवाव्याधिकरणतयाकारणत्वासंभवेनस्वप्रतियोगिचरमवर्णानुकूल
कृतिमत्वसंबंधेनचरमवर्णध्वंसरूपसमाप्तिंप्रतिआश्रयतासंबंधेनआत्मनिष्ठप्रत्यासत्याहेतुत्वस्यवक्तव्यतयाजन्मांतरीयमंग
लानुमानान्नव्यभिचारइतिवाच्यं जन्मांतरीयसमाप्तिमुद्दिश्यशिष्टैस्तदनाचरणात्शरीरेक्षितसमाप्तेरेवतत्फलत्वंकारीरीवत्ननुज
न्मांतरीयसमाप्तेरपि पुत्रेष्टिस्थलेनुपुत्रमात्रफलकत्वश्रवणादामुष्मिकसाधारणफलकत्वंकल्प्यतेतस्मादात्मनिष्ठप्रत्यासत्या
कारणत्वेजन्मांतरीयसमाप्तिमुद्दिश्यापिमंगलकारणापत्तेः स्वप्रतियोगिचरमवर्णावच्छेदकतासंबंधेनचरमवर्णध्वंसरूपसमा
प्तिंप्रतिस्वोत्पत्त्यवच्छेदकजातीयतासंबंधेनशरीरनिष्ठप्रत्यासत्याकारणतायाअवश्यवाच्यतयानास्तिकशरीरेऽवच्छेदकतयामं
गलस्यतज्जन्यविघ्नध्वंसस्यचाभावेनव्यतिरेकव्यभिचारान्नकारणत्वसंभवः ननुविघ्नस्यत्वलीयसमाप्तित्वमेवतज्जन्यतावच्छेद

जन्मान्तरीयमंगलेन समाप्ति वारणेय

॰तर्क॰ २

कं तत्र च न व्यभिचारः विघ्नस्यातीयत्वं विघ्नवज्जातीयशरीरकर्तृकत्वं मंगलजन्यविघ्नध्वंसविशिष्टत्वं वा विशिष्टत्वं च स्वावच्छेदकावच्छि
न्नप्रतियोगिकत्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन। जन्मान्तरीयमंगलजन्यविघ्नध्वंसस्य च स्वावच्छेदकावच्छिन्नप्रतियोगि विघ्नाभावस्यैव समाप्त्यव्यवहित पूर्वक्षणत्वात्
कत्वसंबंधेन नास्तिकसमाप्त्यवच्छेदकाभावेन तस्याः कार्यतावच्छेदकानाक्रान्तत्वादिति चेन्न प्रथमे समाप्त्यव्यवहितपूर्वं विघ्नासत्त्वेन तस्य विशे
षणत्वासंभवात् उपलक्षणत्वे तु प्रथममङ्गलानुष्ठितसमाप्त्युत्तरमपि उत्पत्स्यमानविघ्नवज्जातीयशरीरकर्तृकत्वस्य व्यभिचारस्य दुर्वारत्वादन्यवि
धस्य च विघ्नवज्जातीयशरीरनिष्ठकृतिजन्यत्वरूपस्य तत्कर्तृकत्वस्य दुर्वचत्वात् द्वितीये तु समाप्त्यव्यवहितपूर्वक्षणे तत्र द्व्यक्तित्वेन नि
वेशे वैवो व्यवहितोत्तरत्वस्य चाक्रान्ततया ननुगमात् कारणस्य कार्यतावच्छेदकत्वानुपगमाच्च अन्यथा काशीमरणस्यापि स्वविशि
ष्टमुक्तिं प्रति हेतुत्वस्य सुवचतया काशीमरणं मुक्तिरिति श्रुतेर्हेतुत्वपरतयैवोपपत्तौ प्रयोजकत्वपरत्वोपवर्णनस्यासंगतापत्तेः
न च तमेव विदित्वेति श्रुत्या तत्त्वज्ञानस्यैव मुक्तिसामान्यहेतुत्वप्रतिपादनेन तस्य साक्षात्कारणत्वासंभवात् श्रुतेः प्रयोजकत्वप काशीमरणस्य
रत्वमेवेति वाच्यं तावतापि तत्त्वज्ञानद्वारा हेतुत्वस्यादुष्टत्वाद्विघ्नध्वंसद्वारा समाप्तौ मंगलस्येव न च स्वजन्यतत्त्वज्ञानविशिष्टमुक्तिं राम
प्रति काशीमरणस्य हेतुत्वेऽन्यं प्रतीत्यन्यथासिद्धानतं मुक्तिहेतुरिति वाच्यं स्वजन्यविघ्नध्वंसविशिष्टसमाप्तिं प्रति मंगलस्य हेतु २

द्वयोः स्वसम विघ्नस्योपलक्षणत्वं तयोः समाप्ति —

त्वेपि तस्या दुर्वारणस्य हेतुत्वेऽन्यथैरत्वात् तस्मादन्यथासिद्धतया मंगलं न समाप्तिहेतुः एतेन काशीमरणविशिष्टमुक्तौ काशीम
रणस्य हेतुत्वे दृष्टापत्तिः तत्त्वज्ञानमद्वारीकृत्य न तद्धेतुरिति स्वच नायेव पंचम्याः प्रयोजकत्वपरत्वमिति निरस्तं तथापि तदुत्समाप्तिहेतु
ताबोधकप्रत्यक्षस्मृत्यभावान्नोक्तरिशा मंगलेऽन्यथासिद्धेर्दुर्वारत्वादिति नच निर्विघ्नं समाप्यतामिति कामनया तदाचारात्समाप्तिसत्फ
लत्वमिति वाच्यं नागृहीतविशेषणन्यायेन विघ्नध्वंसकामनाया आवश्यकत्वात् तस्यैव तत्फलत्वात् तस्यैव तत्फलत्वात् न हि यदुद्दि
स्वर्गमायनी सं तचे पवदनमिति तत्ता नेस्म
श्यक्रियते तत्र हेतुः चैत्यवंदनादेरपि स्वर्गफलकत्वापत्तिः तज्जन्यकीर्तनतज्ज्ञानस्य भ्रमतया न तथेति चेत् अत्रापि समाप्तिजनकत्व
ज्ञानस्य भ्रमत्वमादाय विचारसंभवात् पाकप्रवृत्तिकाले तत्प्रवृत्तिकामनाबहुनयत्नेष्टसाधनताज्ञानेन समाप्तिकामनाया अप्युपपत्तेरि
ति न किंचिदेतत् अत एव नास्तिकसमाप्तिप्रतियोगिव्यावृत्तं चरमवर्णवैजात्यं स्वीकृत्य विजातीयचरमवर्णध्वंसरूपसमाप्तिं प्रति मंगलं
हेतुरिति निरस्तं पुरुषविशेषजन्यतावच्छेदकजातिव्याप्यानंतजातिकल्पने प्रमाणाभावात् अन्यत्र क्लृप्तेत्याद्यन्यथासिद्धत्वाच्च तस्मा
द्विघ्नध्वंस एव मंगलस्य फलं समाप्तिस्त्वन्यत्र क्लृप्तसामान्यसामग्रीत एवोपपद्यत इति प्राञ्चः रितिकृतं पल्लवितेन अयं मन्त्र उत्कृष्टः अ
हमस्मादपकृष्ट इति ज्ञानविशेष एव नमस्कारपदवाच्यस्तत्कुतो लभ्यत इत्यत आह परमात्मनिमिति परमत्वं च नित्यज्ञानादिमत्वे

तर्कं ३

नसर्वोत्कृष्टत्वं तथा च समानसंवित्संवेद्यतया सर्वस्मिन्न् तदपेक्षयाऽपकृष्टत्वे ज्ञाते सर्वोतःपातिति निस्वस्मिन्नप्यपकृष्टत्वज्ञानान्नमस्का
र निर्वाह इति भावः नन्वत्र परममहत्परिमाणवत्वं परमत्वं तादृशपरिमाणविशिष्टात्मत्वस्य स्वापेक्षयापकृष्टेपि सत्वेन नमस्कार्यतावच्छे
दकत्वाभावात् यद्यपि नित्यस्वे सोरूपयोग्यत्वे फलावशेषाभावइति नैयमेन सुखसमवायिकारणतावच्छेदकतया सिद्धस्यात्मत्वस्ये
श्वरे स्वीकारे सुखोत्पत्त्यापत्तेः तादृशनियमाभावेपि चात्यंताजनकव्यावृत्तरूपेणैव कारणतापान्नाव्यत्वादीश्वरे आत्मत्वजातिसत्वे प्रमाणा
भावस्तथाप्यन्यपदशक्यतावच्छेदकतयात्मत्वंजातिस्तत्साधारणीसिद्धेति कार्यतावच्छेदकतया कारणतावच्छेदकतया च जातिसिद्धिवद
सति बाधके शक्यतावच्छेदकतयापि जातिसिद्धेरदुष्टत्वादसति बाधके इति विशेषणाच्च नाभावपदशक्यतावच्छेदकतयाऽभावत्वादिजातिसि
द्धिः जन्यभावत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया ध्वंसत्वादेरपि जातितापत्तिस्तद्विशेषणस्यानन्वयतोप्यावश्यकत्वादित्याहुस्तच्चिं
त्यं तथा सति विभुपदशक्यतावच्छेदकतया विभुत्वस्य जातिसिद्धेः न चेष्टापत्तिः एवंविधानंतजातिकल्पने प्रमाणाभावादिति कारणतावच्छे
दकतया च जातिसिद्धिरित्येवांगीकारणीयं एवं च सुखसमवायिकारणतावच्छेदकात्मत्वजातेरीश्वरसाधारण्ये मानाभाव एव वस्तुत
स्तु नहि शक्यतावच्छेदकतया जातिसिद्धिरिति क्रमोपेनोक्तानुपपत्तिरुद्धाव्यतापि तु सुखसमवायिकारणतावच्छेदकत्वेनु जीवात्मनि सि

शक्यतावच्छेदकतया जातिसिद्धेरनंगीकारात्

राम ३

स्वत्वस्तुतां
ताजनकेश्वर

दुःखात्मत्वस्य श्रोतात्मव्यवहारबलेन तत्त्वसंबंधमात्रमीश्वरे कल्प्यते नित्यस्येत्यादिनियमस्य चाप्रयोजकत्वात् अदृष्टरूपसहकार्यन्तराभावादेव
कार्याभावस्योपपन्नत्वात् अत्यंताजनकत्वावच्छिन्नरूपेणैव कारणताकल्पनं च प्रमाणमन्यत्वप्रयुक्तं प्रकृते च श्रोतात्मव्यवहारस्यैव प्रमाणत्वे
नात्यंताजनकसाधारणरूपेणापि कारणत्वकल्पने दोषविरहात् न च सुखसमवायिकारणतावच्छेदकं द्रव्यत्वमेवातिप्रसक्तत्वेपि आत्मत्वस्यै
वावच्छेदकत्वे बाधकाभावादिति वाच्यं कारणत्वानतिप्रसक्तस्यैव कारणतावच्छेदकतया गगनादिषु कारणत्वसंबंधकल्पने गौरवात् अन्यथा स
त्वेनापि हेतुतापत्तेः संभवति व्याप्यधर्मे कारणतावच्छेदके व्यापकधर्मेणान्यथासिद्धो अतिप्रसक्तेरेव बीजत्वात् तस्यात्मकद्रव्यत्वेपि तुल्यत्वात्
आत्मत्वे तथात्वेपि श्रोतात्मवलादीश्वरेपि कारणत्वसंबंधस्य कल्पनीयतयाऽतिप्रसक्तेरभावादित्यं चात्मपदशक्यतावच्छेदकत्वमपि तस्यैवेति
सारं नवीनास्तु नष्ट एव पूर्वदेशसंयोगे उत्तरदेशसंयोगोत्पत्त्या उत्तरदेशसंयोगे पूर्वदेशसंयोगः प्रतिबंधको वाच्यस्तत्र न तावत्पूर्वदेशत्वमु
त्तरदेशभिन्नत्वं उत्तरदेशभिन्नजन्तुरूप पूर्वदेशसंयुक्तस्यैव घोरुत्तरदेशसंयोगात् किं त्वात्मत्वं तत् तथा चात्मसंयोगत्वेन प्रतिबंधकतयायातम्
एवं च तत्प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वेनात्मत्वजातिसिद्धिः विनिगमनाविरहेणैतस्या ईश्वरसाधारण्यमपि न चैकस्मिन्नीश्वरे एव सा जाति
रास्तां न त्वनेकेषु जीवात्मस्विति वाच्यम् एकव्यक्तिकत्वेन तस्या जातित्वासंभवात् तादृशधर्मस्वीकारेपि च प्रत्येकं जीवात्मत्वमादाय विनिगमनावि

०तर्क०
४

रहतावदवस्यात् न चात्मनिरूपितत्वविशिष्टसंयोगत्वेन प्रतिबंधकत्वे आत्मनिरूपितत्वसंयोगत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण वि
जातीयसंयोगत्वेनैव तत्प्रतिबंधकत्वं स्यात् तथा च तत्प्रतिबंधकतावच्छेदककोटौ प्रविष्टतया आत्मत्वजातिसिद्धिरिति वाच्यम् संयोगसंबंधेनात्मनो
पि विनिगमनाविरहेण प्रतिबंधकत्वस्य दुर्वारत्वात् न चैवं तज्ज्ञातेरीश्वरइव गगनादिष्वपि सत्त्वप्रसंग इति वाच्यं गगनादीनामीश्वरानतिरिक्तत्वेन
तत्साधारण्येपि क्षतिविरहादिति निष्कलीकः पंथा इति प्राहुः प्रणम्येति क्त्वातत्पदस्य क्रियतेइत्यनेनान्वयः नमस्कारसिद्धेर्नमःपदेनैव संभवेपि
प्रणमस्य कर्त्रव्यापेक्षया शब्देनावेदर्शितो शिष्यान्प्रत्येवं कुर्वंत्विति शिष्यशिक्षार्थमेव क्त्वातेनतन्निर्देशः अत्र प्रणम्येत्यनेन भक्तिश्रद्धातिशयो ध्योत्यते
युक्तिमुक्त्योरित्यनेन युक्तीनां मुक्त्या साहचर्यप्रदर्शनेन निर्दोषत्वं मंजरीपदेन च स्वीयवाक्यावलीकोमलत्वं सूचितं प्रवृत्तिसामान्यं प्रति इष्ट
साधनताज्ञानस्य हेतुत्वात् प्रयोजनज्ञानं विना कथमेतद्ग्रंथे प्रवर्त्तेतामित्यतआह इहेत्यादि मननोपायमात्मन स्तत्वज्ञानं निखिललोकविमोक्ष
मुख्योपायमात्ममननेतीति योजना तथा च केवलकामनाविषयीभूतापवर्गजनकतत्वज्ञानप्रयोजकतया एतद्ग्रंथेन प्रवृत्तस्यानुपपत्तिरिति भाव
मोक्षमुख्योपायत्वं च मुक्तिं प्रति भावप्रयोजकीभूताभावप्रतियोगित्वं केचित्तु काशीमरणादितोपि श्रवणानधिकारीस्त्रीशूद्रादिलोकस्य मुक्ति रम ४
संभवेन तत्वज्ञानाभावस्य तदभावेप्रयोजकत्वाभावात् तल्लोकपदं श्रवणाधिकारिपरतया व्याख्येयं तथा च श्रवणाधिकारिलोकमुक्तिभावेतत्त

ज्ञानाभावस्य प्रयोजकत्वलक्षणानोक्तदोष इति व्यवस्थिते तदसत् अनधिकारिब्राह्मणादीनामपि काशीमरणादितः मुक्तिसंभवेन तथाविवक्षितेप्य
नुपपत्तेर्जागरूकत्वात् तस्मात्तत्वज्ञाने मोक्षमुख्योपायत्वस्याव्यवहितोत्तरक्षणोत्पत्तिकमुक्त्यन्ताभावप्रयोजकीभूतताभावप्रतियोगिकत्वमेव वक्त
व्यं तत्र च नोक्तानुपपत्तिः तथा चालोकपदं यथाश्रुतमेव अत एव काशीमरणजन्यमुक्तेर्मननोपायकतत्वज्ञानाजन्यत्वाद्धि मोक्षेति का
शीमरणप्रयोज्यमोक्षेत्यर्थ इति निष्कृष्टतरमूहनीयं अत्र च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसत्वं मुक्तित्वं दुःखध्वं
सस्येदानीमपि सत्वेनास्मदादीनामपि मुक्ततापत्तिवारणाय कालीनान्तं मुक्त्यात्मकदुःखध्वंसस्यान्यदीयदुःखप्रागभावसमानकालीनत्वात्
वामदेवशुकात्मनामप्यमुक्तत्वप्रसंगात्स्वसमानाधिकरणत्वं प्रागभावविशेषणं न च दुःखासमानकालीनत्वेनैव सामंजस्यात्प्रागभावेति व्य
र्थमिति वाच्यं तथा सन्निवेशेन वैयर्थ्याभावात् तथाप्यनतिप्रयोजनकत्विस्समानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वमेव मुक्तित्वं
ननु स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वस्य मुक्तित्वरूपत्वे तस्य तत्वज्ञानजन्यतावच्छेदकत्वानुपपत्तिः स्वपदस्य दुःखध्वं
ससामान्यपरत्वे पुरुषांतरीयदुःखध्वंससमानाधिकरणदुःखासमानकालीनदुःखध्वंसस्येदानीमप्रसिद्धापत्तेः स्वपदस्य तत्तद्दुःखध्वंसपरत्वे
च सामान्यतः मुक्तित्वस्यैक्याभावेन मुक्तित्वावच्छिन्नं प्रति तत्वज्ञानत्वेन हेतुतायाः असंभवदुक्तिकतापत्तेरिति चेन्न स्वसमानाधिकरण

०तर्कं० कालिकविशेषणतोऽन्वयसंबंधेन दुःखवान्यस्तद्भिन्नदुःखध्वंसत्वस्यैव मुक्तित्वरूपत्वात् अत्र च स्वत्वस्य परिचायकतया नोक्तविकल्पावसर इति
५ अत्र तत्त्वज्ञानादीनां क्षणिकत्ववारणाय विभुसमवेतयोग्यविशेषगुणनाश्यतावच्छिन्नं प्रति स्वोत्तरोत्पन्नविशेषगुणत्वेन नाशकत्वपातत एव
5 मुक्त्यात्मकदुःखध्वंससत्त्वे चैतत्तत्त्वज्ञानत्वेन हेतुतायां मानाभाव इति यद्विविच्यते तदा दुरितवद्भिन्नदुरितध्वंसत्वमेव मुक्तित्वमवसेयं नचा
गे दुरितानुत्पन्नाद् दुरितवद्भिन्नदुरितध्वंसत्वस्यार्थसमाजग्रस्तप्रमाणाभावस्यैवार्थसमाजग्रस्तधर्मस्य कार्यतानवच्छेदकत्वबीजतया यत्कृते मुक्तित
त्वज्ञानकार्यकारणभावबोधकवेदस्यैव बीजत्वेनार्थसमाजग्रस्तत्वेपि कार्यतावच्छेदकत्वबाधकाभावात् नच सुखदुःखाभावयोरन्यतरत्वात्कथं कार्य
तावच्छेदकमिति वाच्यं तस्यैव पुरुषार्थत्वेन मुक्तेरपुरुषार्थत्वप्रसंग इति वाच्यं बलवद्द्वेषविषयाभावत्वेन पुरुषार्थत्वस्य दुःखाभाववद्दुःखजन
कदुरितध्वंसेपि संभवादिति ननु तथापि काशीमरणान्मुक्तिरिति वाक्येन काशीमरणस्यापि साक्षान्मुक्तिहेतुत्वप्रतिपादनात् मुक्तित्वावच्छिन्नं
प्रति तत्त्वज्ञानत्वेन हेतुत्वे व्यभिचार एवेति चेन्न तमेवं विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्य
हर्वेनावेदर्शिते काशीमरणस्य तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमित्येव तदर्थत्वात् सयुक्तिकं चैतत् अन्यथा तयोः परस्परजन्यमुक्तौ व्य राम
भिचारेवारणाय अन्यतराप्यव्यवहितोत्तरत्वनिवेशगौरवात् नच काशीमरणस्य तत्त्वज्ञानं प्रति हेतुत्वेपि श्रवणादिजन्यतत्त्वज्ञाने व्यभिचार ५

वारणायाव्यवहितोत्तरत्वनिवेशोऽविशिष्ट इति वाच्यं गंगामरणादिजन्यतत्वज्ञाने व्यभिचारवारणाय श्रवणादिजन्यतावच्छेदककोटावव्यवहितोत्तर
त्वनिवेशस्यावश्यकत्वात् श्रवणादिजन्यतत्वज्ञाने व्यभिचारवारणाय परं काशीमरणजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेश इति तन्नि
न्निवेशस्यैकधैव संभव्यत । नव्यमते तु काशीमरणजन्यमुक्तौ व्यभिचारस्तिर्यक्तत्वज्ञानजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशः एवं तत्व
ज्ञानजन्यमुक्तौ व्यभिचारवारणाय काशीमरणजन्यतावच्छेदककोटावप्यव्यवहितोत्तरत्वनिवेश इत्युभयत्राव्यवहितोत्तरत्वनिवेशस्यावश्यक
त्वेनातिगौरवादिति ननु तथाप्युभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिरित्यनेन कर्मणामपि मुक्ति
हेतुत्वप्रतिपादनात् कथं तत्वज्ञानस्यैव मुक्तिहेतुत्वमिति चेन्न तस्य तत्वज्ञानप्रतिबंधकाधर्मध्वंसद्वारा तत्वज्ञान एवोपक्षयात् ननु मुक्तिं प्रत्येव सा
क्षात्तस्य हेतुता नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरोधात् तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतिविरोधाच्च
किं च यत्याश्रमविहितकर्मण एव हेतुत्वे गृहस्थस्यामुक्तत्वप्रसंगः कर्मणैव हि संसिद्धिमास्थिता जनकादयः अहं कृत्स्नन्यवादी च गृहस्थोपि हि मुच्यत
इति गृहस्थस्यापि मुक्तिश्रवणात् गृहस्थाश्रमविहितकर्मण एव हेतुत्वे च यतेरमुक्तत्वप्रसंगात् नहि मुक्तौ वैजात्यमस्ति येनोभयोरपि हेतुत्वमुपपादनीयमि
ति अत एव काशीमरणस्य कर्मणां वा साक्षान्मुक्त्युपायत्वनिरासाय मोक्षमुख्योपायमित्यत्र मुख्येत्युक्तं स्येतरमोक्षासाधारणकारणकभिन्नत्वमित

तर्क० ६

6

र्थः मुक्तित्वावच्छिन्नकार्यतानिरूपितकारणत्वं चात्रासाधारणकारणत्वं तेनप्रागभावादीनांतत्तद्व्यक्तित्वेनहेतुत्वेपिनक्षतिरितिदिक् ननुआत्म
शरीरादिभ्योभिन्नइत्याकारकंतत्त्वज्ञानमिदानीमपिसंभवतितत्कथंनमुक्तिहेतुरितितत्राह मननोपायमिति मननमुपायोयत्रेत्यर्थः त
थाचश्रवणमनननिदिध्यासनप्रयोज्यतत्त्वज्ञानमेवमुक्तिहेतुः तच्चनेदानींसंभवतीतिभावः यद्यपिश्रवणोपायमित्येववक्तुमुचितं
तथापिमकारानुप्रासवशात् मननोपायमित्युक्तं युक्तिभिरनुचिंतनंमननं साधकबाधकप्रमाणोपन्यासश्चयुक्तिः श्रोतव्यः
श्रुतिवाक्येभ्योमन्तव्यश्चोपपत्तिभिरितिस्मरणात् श्रुतस्यार्थस्यैवंतर्केणदीर्घकालमनुसंधानंनिदिध्यासनमितिबोध्यं दितेति तत्त्वज्ञा
नमित्यर्थः नीलपटीसुंदरः सचमानीत्यादौसर्वनाम्नाननीलाद्युपस्थापकत्वं किंतुमुख्यविशेष्यस्यैवेत्यतः अत्रापिपूर्वोपस्थिततत्त्व
ज्ञानस्यैवोपस्थापनात्तत्तन्मननमित्यर्थः मननस्यमुख्यविशेष्यतयापूर्वमनुपस्थितत्वेनतद्बाधासंभवादित्यवधेयं प्रमाणाधीनामिति प्र
माणज्ञानप्रयोज्यमित्यर्थः श्रवणादिप्रयोज्यमात्मनिइतरभिन्नत्वज्ञानमवहिततत्त्वज्ञानंतच्चनेतरपदार्थतत्त्वज्ञानंविनातच्चनप्रमाणज्ञानंवि
नाप्रमेयव्यवस्थितेः प्रमाणज्ञानाधीनत्वादितिप्रमाणनिरूपणमावश्यकमितिभावः यद्वातत्त्वज्ञानस्यमननद्वाराप्रमाणाधीनत्वस्सूचना ६
यमनौनेपायमित्युक्तं वस्तुतस्तु वक्तृबुद्धव्यवस्थितविशेषणस्यापितत्कृष्टेनपरामर्शदर्शनात् अव्यवहितोपस्थितमुख्यविशेष्यमात्रोपस्थाप

कत्वनियमस्योत्सर्गिकत्वं तात्पर्यस्य नियामकत्वाच्चनोक्तातिप्रसंगः एवं च तच्छ्रमननं चेत्यर्थः साधकबाधकरूपप्रमाणोपन्यासरूपस्तु युक्तिनि
रन्तुचिंतितरूपमननस्य प्रमाणज्ञानं विनासंभवादिति भावः प्रमाणनिरूप्यत इति लक्षणस्वरूपादिप्रकारकवैशमाननिरूपणविषयीकृतंप्र
माणमित्यर्थः तत्रेति प्रमाणेनिरूपणीये इत्यर्थः प्रमायाः करणमिति अत्र प्रमाणपदवाच्यत्वलक्ष्यतावच्छेदकं प्रमाकरणत्वं च लक्षणं नातः प्र
माणत्वस्य प्रमाकरणत्वरूपत्वेन लक्षणलक्ष्यतावच्छेदकयोरभेदापत्तिः यथा च तयोरभेदेन दोषापत्तिस्तथा विवेचनीयमुपरिष्टात् ननु प्रमाकर
णमिति विन्यासप्रमायाः करणमित्युक्तौ किं बीजमिति चेन्न लक्षणवाक्याद्यार्थस्य बोधस्यैव लक्षणत्वेन प्रमानिरूपितकरणत्वस्य
लक्षणत्वलाभाय तथोक्तेः अन्यथा तत्पुरुषे दर्वपरलक्षणया प्रमासंबंधनिन्नकरणमित्यर्थलाभे इतरभेदानुमाने हेतौ वैयर्थ्यस्य दुर्वारत्वात्
गुरुत्वाच्च लक्षणवाक्यतात्पर्यविषयीभूतार्थस्यैव लक्षणत्वोपगमेन प्रमानिरूपितकरणत्वस्यैव तात्पर्यमतस्यैव हेतुत्वोपपादनेनप्रयासगौर
वमिति वस्तुतस्तु प्रमाकरणमित्यभेदेनान्वयभ्रमनिराकरणाय प्रमायाः करणमित्युक्तिः असाधारणधर्मो हि लक्षणं यथा सास्नादिशृंगव
ती गौरिति सास्नावत्वमात्रं सरटे शृंगवत्वमात्रं महिष्यादावतिव्याप्तमिति सास्नादिशृंगवत्वविशिष्टं धर्मो लक्षणं तदितरावृत्तित्वे सति सकलतद्वृत्ति
त्वं असाधारणत्वं शृंगवत्वगगनकुसुमरूपत्वादेर्गौलक्षणत्ववारणाय सत्यंतं तद्वृत्तित्वसाकल्याभावाय यथायथं सन्निवेशः तदिदमुक्तं लक्षणेतान्येवप

गगनस्य तदितरावृत्तित्वे सत्यपि तद्वृत्तित्वाभावान्नलक्षणत्वम्

तर्क० १ दानि ग्राह्याणि यैः पदैरतिव्याप्तिरव्याप्त्यसंभवदोषा निराक्रियंते ॥ अलक्ष्ये लक्षणगमनमतिव्याप्तिः यथा शृंगवती गौरिति लक्ष्यैकदेशे लक्षणस्याव
र्त्तनमव्याप्तिः यथा कृष्णा गौरिति लक्ष्यैकाप्यवर्त्तनमसंभवः यथा एकशफा गौरिति इत्थं चात्र छिदिक्रियाकरणे कुठारादावतिव्याप्तेर्वारणा
य प्रमापदोपादानं दोषदुष्टचक्षुरिंद्रिये भ्रमात्मकज्ञानकरणत्वादतिव्याप्तेः प्रपदं प्रमाप्रमाणमित्युक्तौ चक्षुरिंद्रियेऽव्याप्तिरतः प्रमाकरण
मिति विशिष्टमुपात्तं ननु दोषदुष्टचक्षुरिंद्रियेणापि कदाचित्प्रमाजननात्तत्र प्रमाणव्यवहारोऽस्त्येव न च दुष्टतादशायां तादृक्व्यवहार
प्रतिवाच्यं न हीदं कालत्रयघटितं लक्षणं येन तस्मिन्काले आपत्तिः स्यात् किंतु जातिरिंद्रिये आपादनीयं तत्र दोषस्य स्यतादशायामिष्टापत्तेरिति चे
न्न यत्र पूर्वं पीतादिना शंखे चक्षुरुत्पन्नं भ्रममेवोत्पाद्य तत्त्वांशे पीतत्वप्रमायामजनके केनापि प्रमाणव्यवहारस्यास्वीकारादतिव्याप्त्यापत्त्या प्रप
दस्यावश्यकत्वात् दोषवशेनान्यदीयेदंत्वस्यैव ज्ञानसंभवेन सर्वांशे भ्रमस्यापि संभवात् यदि च सर्वं ज्ञानं धर्मिण्यभ्रांतं प्रकारे तु विपर्यय इति
नियमात्सर्वांशेन भ्रमोऽसंभवः तथापि तत्र दर्पमादायैव प्रमाणव्यवहारापत्तेः पीतः शंख इति भ्रमजनकेऽपि तत्त्वांशे प्रमाणत्ववारणाय तत्र भ्रमात्वलाभा
य प्रपदस्यावश्यकत्वात् अनुभवस्यापि संस्कारद्वारा स्मृतिरूपज्ञानकरणत्वादतिव्याप्तेः स्मृप्रपदमिति ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वा १
त्प्रमाज्ञानं विना कथं प्रमाकरणत्वं ज्ञानमित्यत आह प्रमा चेति यद्वा ननु प्रमात्वं यथार्थज्ञानत्वं तथा च स्मृतेरपि प्रमात्वेन तत्करणेऽनुभवेऽतिव्याप्तिरि

तिभावः अत्र चानुभवत्वस्यैव प्रमात्वरूपत्वेन्न मेऽतिव्याप्तिः यथार्थत्वस्यैव तद्रूपत्वे च स्मृतावतिव्याप्तिरित्यनुभवोपादानं ननु प्रमात्वस्यानुभवघ
टितत्वे प्रमाणाभावः न चैवं स्मृतिरूपप्रमाकरणतयाऽनुभवस्य प्रमाणत्वापत्तिः दूरत्वात् अनुमित्युपमितिशाब्दभिन्नप्रमितिकरणत्वेन च प्र
त्यक्षप्रमाणविभजनान्न विभागव्याघातोपीत्यत आह यदाहुरिति मानमिति मानमित्यादि यथार्थोनुभवो मानमनपेक्षतयेष्यत इति या
वत् भावल्युटा मानमिति प्रमितिरिति यावत् अपेक्षतया इत्यस्य प्रमाण्यानधीनप्रमाण्यकतया स्मृतेः प्रमात्वं ह्यनुभवप्रमात्वाधीनमिति स्मृ
तेरप्रमात्वमित्यर्थः यदसाधारणं सहकार्यासाद्य मनो वहिर्गोचरां प्रमां जनयति तस्यैव प्रमाणान्तरत्वमिति नियमेनानुभवसहकारेण म
नसः स्मृतिरूपप्रमाजनकत्वादनुभवस्य प्रमाणान्तरत्वापत्तिरतः स्मृतिव्यावृत्तमेवानुभवत्वघटितं प्रमात्वमवश्यं वाच्यं एवं प्रत्यक्षं निवेशा
नुमितिमविवेश्य प्रत्यक्षोपमितिशाब्दभिन्नप्रमितिकरणत्वेनानुभवस्यानुमानेप्यंतर्भावापत्तिः विनिगमनाविरहादिति भावः तद्वतीति तद्व
द्विशेष्यकत्वे सतीत्यर्थः न चैवं वह्निगुंजापुंजयोरिमौ गुंजापुंजवह्नी इति विपरीतभ्रमे वह्न्यंशे वह्नित्ववत्विशेष्यकत्वस्य गुंजांशे च वह्नित्वप्रका
रकत्वस्य सत्वात् तत्रापि प्रमात्वापत्तिरिति वाच्यं तद्वद्विशेष्यकत्वावच्छेदेन तत्प्रकारकत्वस्य विवक्षितत्वात् तद्वन्निष्ठविशेष्यतानिरूपिततन्नि
ष्ठप्रकारताशालित्वमिति तन्निष्कर्षः तथा च तत्संबंधावच्छिन्नतद्वन्निष्ठविशेष्यतानिरूपिततत्संबंधावच्छिन्नतन्निष्ठप्रकारताशालिज्ञानत्वं तत्सं

वंधावछिन्नतत्प्रकारकप्रमात्वमिति फलितं तत्संवंधावछिन्नतद्वत्वनिवेशात् तेन संवंधेन तद्विरहवत्यपि कालिकादिसंवंधेन तद्वत्वस्य सत्वेपि न भ्रमेऽ
तिव्याप्तिः एवं रजत एव संयोगादिसंवंधेन रजतत्वप्रकारकज्ञानस्यापि प्रमात्वापत्तिरिति तु न यत्र तत्संवंधावछिन्नत्वनिवेशः तद्घेलक्षणं ग्राह्यमिति।
न वतिहीति तद्वति ज्ञेरेतत्ववति तत्त्वगाहीरजतत्वावगाही अलक्ष्येलक्षणसत्वप्रदर्शनव्याजेन तद्वतीत्यस्य व्यावृत्तिमाह शुक्ताविस्यादिना न
तद्वतीति रजतत्ववतीत्यर्थः किंतु रजतत्वावगाहित्वात् भ्रम एवेति भावः एतेन तदभाववति तत्प्रकारकं ज्ञानं भ्रम इति भ्रमलक्षणं सूचितं
ननु वृक्षः कपिसंयोगीति ज्ञानस्यापि मूलावछेदेन संयोगाभाववति संयोगप्रकारकत्वात् भ्रमत्वापत्तिरिति चेन्न प्रतियोगिव्यधिकरणतद
भाववत्वस्य विवक्षितत्वात् वृक्षे संयोगाभावस्य न प्रतियोगिव्यधिकरण इति नानुपपत्तिः न चैवं मूले वृक्षः कपिसंयोगीति ज्ञानस्य भ्रम
त्वानुपपत्तिरिति वाच्यं तत्रावछेदकत्वांश एव भ्रमत्वांगीकारात् नतु संयोगांशेपीति ननु अस्तु तद्वति तत्प्रकारकज्ञानत्वस्यैव प्रमात्वरूपत्वे सं
शयेऽतिव्याप्तिरतो निश्चयत्वघटितमेव तद्वाच्यमित्याशयेनाशंकते नन्वेवमिति एवं निश्चयत्वाघटितस्यैव प्रमात्वरूपत्वे रजतत्वांश इति एक
धर्मिकविरुद्धनानाकोटिकं ज्ञानं संशय इति रजतत्वसंशये रजतत्वरजतत्वाभावौ कोटी तत्र रजतत्वाभाववति रजतत्वाभावप्रकारकत्वाभाव ८
त्रजतत्वाभावांशे प्रमात्वेपि रजतत्ववति रजतत्वावगाहित्वात्तदंशे प्रमात्वमिष्यत एवेति भावः निश्चयत्वाघटितमेव प्रमात्वमित्यत्र प्राचीन

सम्मतिमाह तद्वतीति स्मृतिव्यावर्त्तनीयायानुभवत्वघटितं परमंगीकुर्वतीति ननु संशयव्यावर्त्तनाय निश्चयत्वघटितमपीति भावः शंकते शाखेति क्व
चिन्न क्वचित्स्यैव पाठः अविवादान्मूले इति मूलावच्छेदेनांततो गगनादिसंयोगस्य सत्त्वान्मूले वृक्षः संयोगीति प्रत्ययस्य प्रमात्वं सर्वसंमतमेवेत्यतः क
पिसंयोगीति अवच्छेदकत्वप्रत्ययस्तु कपिसंयोगावच्छेदकत्वप्रत्ययस्तु मतया न प्रमा तस्य मूलस्य तदनवच्छेदकत्वात् कपिसंयोगानवच्छेदकत्वा
त् कपिसंयोगवति वृक्षे कपिसंयोगप्रकारकत्वात्कपिसंयोगांशे प्रमात्वमेवावच्छेदकत्ववति अवच्छेदकत्वप्रकारत्वाभावाच्च न तदंशे प्रमात्वमिति भावः कn
ननु स्मृतिभिन्नज्ञानत्वमनुभवत्वमित्यत्र संस्कारजन्यज्ञानत्वमेव स्मृतित्वमिति वाच्यं तच्च प्रत्यभिज्ञायामतिप्रसक्तमनुगतं दुर्वचं संस्कारत्वेन त
ज्जन्यत्वं च स्मृतित्वस्य जातित्वेन तत्संस्कारत्वेन जनकताया मानाभावेनासंभवितस्य जातित्वे च संस्कारजन्यत्वघटितत्वाद्गुरुतरं लक्षणं स्यात् यदि
च स्मृतित्वं जातिः तदवच्छिन्नप्रतियोगिकभेदस्यैव च निवेशान्न गौरवमिति विभाव्यते तदनुभवत्वमपि जातिः तद्विशिष्टत्वमेव लक्षणमास्तामुक्तमे
तावत्कुत्र स्वोत्प्रेक्षयेत्याह जातिविशेषो वेति नन्वत्र किं मानमत आह अनुभवामीति अनुगतप्रतीतेरनुगतधर्मं विनाऽनुपपत्तेरनुगतधर्मोऽ
भ्युपेयः तस्य चोपाधिरूपत्वे गौरवाज्जातित्वमेव न्याय्यमिति भावः अभावत्वस्यानुगतप्रतीत्याऽभावत्वरूपजातिसिद्ध्यापत्तिरतो बाधकं विनेति त
त्र तु जातिबाधकस्यैव सत्त्वान्नित्यानेकसमवेतत्वस्यैवाजातित्वादिति भावः तथा चोक्तं व्यक्तेस्तुल्यत्वं अरभेदस्तुल्यत्वं संकरोऽथानवस्थि

तिः रूपहानिरसंबंधो जातिबधकसंग्रहः व्यक्तेरभेदः स्वाश्रयव्यक्तेरैक्यं यथाआकाशत्वादि व्यक्तेस्तुल्यत्वं अन्यूनानतिरिक्तव्यक्तिकत्वं यथाघटत्व
कलशत्वादि परस्परात्यंताभावसमानाधिकरणयोर्धर्मयोरेकस्मिन्समावेशः संकरः यथाभूतत्वमूर्त्तत्वादि अनवस्थायथाजातित्वादि विशेषत्व
जातिस्वीकारे रूपहानिः रूपस्य लक्षणस्य सामान्यभिन्नत्वे सति समवेतत्वे च सति सामान्यरूपरहितत्वरूपविशेषलक्षणहानिः विशेषत्वरूप
जातेरेवेतरव्यावर्त्तकत्वात्स्वतएव व्यावर्त्तकत्वरूपविशेषस्वरूपहानिरित्यर्थः असंबंधः असमवेतत्वं यथाकंबुग्रीवादिमत्वादिति केचित्तु स्वतो
व्यभिचारवारणाय विशिष्टवैशिष्ट्यावगाह्यनुभवत्वस्यैव विशेषणतावच्छेदकप्रकारकंनिर्णयजन्यतावच्छेदकत्वमुपेयं तथाचजुतेन्यतावच्छेदक
कोटिप्रविष्टत्वेनानुभवत्वं जातिरित्याहुः अत्र च स्वर्गाद्यनुमितिशाब्दबोधानंतरं स्वर्गादिकमनुभवामीति प्रत्ययापत्तेः साक्षात्कारत्वरूपमेवानुभव
त्वमनुभवामीति प्रत्यक्षविषयः इति न तादृशप्रत्यक्षविषयतया प्रत्यक्षादिचतुष्टयसाधारणात्वसिद्धिः यद्यपि विशेषणतावच्छेदकप्रकारकनिर्ण
यजन्यतावच्छेदकतया तत्सिद्धिरिति नरपिनः नित्यव्यावर्त्तनायजन्यानुभवत्वमेव तत्कार्यतावच्छेदकमुपगंतव्यं तत्र जन्यत्वं ध्वंसप्रतियोगित्वं
प्रागभावप्रतियोगित्वं वा कालिकसंबंधेन घटत्वादिमत्वं चेति निर्विकल्पमशक्यतया जन्यप्रत्यक्षमात्रवृत्तिवैजात्यमेव कार्यतावच्छेदकं वाच्यं तथा च कुतः ६
सकलप्रत्यक्षादिसाधारणानुभवत्वजातिसिद्धिरित्यास्तामसवशेन प्रमाकरणंतु घटं करणं लक्षयति व्यापारवदिति कपालेति तत्रा

ण्यसाधारणकरणत्वसत्वादितिभावः असाधारणेतीति असाधारणकारणत्वं च कार्यतानवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं ईश्वरज्ञा
नस्य तु उपादानप्रत्यक्षत्वविधया कार्यत्वावच्छिन्नं प्रत्येव हेतुतान्नातिव्याप्तिरिति भाव नतु कार्यतावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं तत्र
तथा सति कार्यमात्रं प्रति कालस्य हेतुत्वेन कालोपाधिविधया चक्षुरादीनामपि कार्यमात्रं प्रति हेतुतया असंगत्यापत्तेरिति ध्येयं ननु फलायोगव्य
वच्छिन्नं कारणमेव करणं अत एवात्मानज्ञानकरणं तस्य नित्यत्वेन फलायोगव्यवच्छेदाभावादित्यत्ति प्रायेणाशंकते नन्वेवमिति एवं एवंविधलक्ष
णकरणे व्यापारस्य सत्वादिति तन्नु न्यज्ञानतावच्छिन्नं प्रति असाधारणकारणत्वाच्चेत्यपि द्रष्टव्यं तज्जन्यत्वे सतीति जैतन्यत्वस्य फलेऽपि सत्वान्नज्ञ
न्यजक इति तज्जन्यजनकत्वस्य चेश्वरज्ञानादावपि सत्वात्तज्जन्यत्वे सतीति स्यादेवेति सहकारिविरहे फलायोगव्यवच्छेदस्यासंभवित्वा
त् सहकारिसमवधाने फलायोगव्यवच्छेदस्य चात्मन्यपि सत्वेन तत्कृतेऽव्याप्तेरिति भावः नन्वेकस्यैव कर्तृत्वकारणत्वस्वीकारे कर्तृक
रणमिति नानाविधव्यवहारोऽनुपपन्नः व्यवहर्तृव्यक्तिभेदस्यैव व्यवहारभेदनियामकत्वादित्यत आह उपाधीनामिति तथा चोपाधेयसंकरे
ऽप्युपाधेरसंकरत्वादिति न्यायेन व्यवहर्तृव्यक्तिभेदेऽपि व्यवहर्तृव्यतावच्छेदकभेदादेव व्यवहारभेदः यथा घटरूपव्यवहर्तृव्यक्तिभेदेऽपि घटत्वादृ
व्यत्वादिरूपव्यवहर्तृव्यतावच्छेदकभेदादेव घटो द्रव्यमित्यादिव्यवहारभेदः एवं पाचकपाठकादिव्यवहारोऽपीति भावः अत एवेति एकस्यै

वकर्तृत्वकरणत्वस्वीकारादेवेत्यर्थः अत एवात्मनः करणत्वस्वीकारादेव तृतीयेति तृतीयायाः करणत्वार्थकत्वादिति भावः अंगीचकुरित्यस्वरसोद्भाव
नं तद्बीजं तु सर्वत्रैवाखंडोपाधिरेवानुगतधीरीति विषयत्वे सखंडोपाधेरुच्छेद एवेति नच कर्तृत्वादिव्यावर्तकं करणत्वनिर्वचनानुपपन्नात्तस्याखंडोपाधिरूप
त्वमेव उपाय इति वाच्यं तस्य तत्साधारण्येप्यस्ततः व्यवहारभेदस्य व्यवहर्तव्यतावच्छेदकभेदादेवान्यत्राप्युपपत्तेरिति नन्वेवमप्यात्मनः प्रमाणत्वापत्ति
रितिचेन्न अनुभवत्वव्याप्यजात्यवच्छिन्नप्रमावृत्तिकार्यतानिरूपितकारणताशालित्वे सति व्यापारवत्तस्यैव प्रमाणत्वरूपत्वेनात्मनि तदसंभवादि
ति यत्तु तमोभिन्नत्वाद्द्युतत्स्यात्लोकजन्यतावच्छेदकतापर्याप्तिनिवेश आवश्यकः इत्थं च जन्यज्ञानत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुतयाज्ञानत्वजातेर
वच्छेदककोटिप्रविष्टत्वेपि कार्यतावच्छेदकतापर्याप्त्यधिकरणत्वाभावान्न तएवव्वारणेऽनुभवत्वव्याप्येति भागदेयं तन्न तथापि नित्यवृत्तिधर्मस्यका
र्यतावच्छेदकत्वोपगमे ज्ञानत्वावच्छिन्नं प्रत्येवात्मत्वेन हेतुतयाज्ञानत्ववारणाय तदावश्यकत्वादिति चार्वाकमते प्रत्यक्षस्यैव प्रमाणत्वात् मतानां चा
नुपलब्धेरपि प्रमाणत्वात्तन्निरासायाह चतुर्विधमिति तत्रेति चतुर्विधप्रमाणमध्ये इत्यर्थः तत्र प्रथमोद्दिष्टं प्रत्यक्षप्रमाणं लक्षयति साक्षात्का
ररूपेति साक्षात्कारेति अनुमानादावतिव्याप्तिवारणाय साक्षात्कारप्रमेत्युक्ते साक्षात्कारस्य प्रमेति भ्रमः स्यात् साक्षात्कारप्रमेत्युक्तावपि तथैव तत: १०
रूपेति इयं साक्षात्कारोमीति प्रतीतिः इंद्रियेति तथा च न साक्षात्कारत्वरूपजातिसिद्धिरिति भावः ज्ञानमात्रस्येति तथा च मनोरूपेंद्रियजन्यत्वस्या

नुमित्याद्यावपि सत्वेन तत्रापि साक्षात्करोमीति प्रतीत्यापत्तिरिति भाव: ननु इंद्रियत्वावच्छिन्नजनकतानिरूपितजन्यत्वमेव विषय: मनसस्तु मानसज्ञान एव
इंद्रियत्वेन हेतुत्वं अनुमित्यादिकं प्रति तु मनस्त्वेनेत्यरुचेराह इंद्रियाप्रतीतावपीति इंद्रियत्वाप्रतीतावित्यर्थ: तथा चेंद्रियत्वज्ञानं विना तद्घटितधर्मज्ञानाज्ञा
नाभावात् तादृशधर्मस्य विषयत्वसंभव इति भाव: वस्तुतस्तु साक्षात्कारत्वरूपजात्यभावे इंद्रियत्वेन कार्यकारणभावासंभवात् ऐंद्रियत्वेनेंद्रियजन्यत्वस्य सा
क्षात्कारत्वरूपत्वासंभवान्नेदमवतारणीयं परं तु नन्विंद्रियनिरूपितविषयतासंबंधावच्छिन्नजन्यताशालिज्ञानत्वमेवानुमित्यादिव्यावृत्तं तद्विषय इ
त्यत आह इंद्रियेति इंद्रियाज्ञानेपीत्यर्थ: तथा प्रतीते: साक्षात्करोमीति प्रतीतेरित्यर्थ: एतेन ज्ञानाकरणकं ज्ञानं प्रत्यक्षमित्यपि निरस्तं तद्ज्ञानेपि
साक्षात्करोमीति प्रतीते:
तत्प्रतीतेर्जायमानत्वादिति अवश्याभ्युपेयत्वाच्चानुभवत्वादिजातिरेव नानुगताविषय इत्याह नापीति अननुगतत्वादिति अननुगतप्रतीतेश्चानुगत
साक्षात्कार
धर्मं विनानुपपत्तिरिति भाव: नन्वनुपनीतज्ञानान्नेतरं साक्षात्करोमीत्यप्रतीतेर्लौकिकविषयतायास्तद्व्यंजकत्वेनावश्यकत्वाल्लौकिकविषय
ताशालिज्ञानत्वमेव साक्षात्करोमीति प्रतीतिविषय: एवमननुगतप्रतीत्यैव जातिसिद्धौ विन्दुर्विन्दुरित्यनुगतप्रतीत्या विन्दुत्वरूपजातिसिद्धि: स्या
त्किं तु कारणतावच्छेदकतया कार्यतावच्छेदकतया वा तत्सिद्धि: न चात्र तत्संभवति न चेंद्रियत्वावच्छिन्नावच्छिन्नकारणतानिरूपितकार्यताव
च्छेदकतया तत्सिद्धिरिति वाच्यं इंद्रियत्वस्यैकस्याभावात् इंद्रियनिष्ठेष्वेकत्वेषु वैजात्यं स्वीकृत्य विजातीयैकत्ववत्त्वरूपस्य तस्य संभवेपि कार्य
पृथिवीत्वादिना संकरात्-

इंद्रियजन्य ज्ञानत्व:

मात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वेन साक्षात्कारत्वस्य नित्यवृत्तितया जन्यक्तावच्छेदकत्वासंभवात् जन्यत्वस्य निवेशे च जन्यत्वस्य ध्वंसप्रतियो-
गिकत्वप्रागभावप्रतियोगित्वादिविकल्पग्रासेन निवेक्तुमशक्यतया जन्यसाक्षात्मात्रवृत्तिवैजात्यं स्वीकृत्य तस्यैव जन्यतावच्छेदकत्वावश्यकत्वया कुत-
स्त्वकोटिश्च विष्टतया साक्षात्त्वरूपजातिसिद्धिः एवं चास्तु वर्सस्पर्शनादौ विशिष्य चक्षुरादीनां हेतुत्वावश्यकतया तादृशसामान्यकार्यकारणभावे मा-
नाभावाच्चेत्यत आह यद्वेत्यादि जन्यधीत्यादि जन्याया धीस्तज्जन्यमात्रवृत्तिर्या जातिस्तच्छून्यज्ञानत्वं साक्षात्कारत्वमित्यर्थः तद्दलक्षणे गमयति
नवतीति हेति अनुमितित्वादीत्यादिपदादुपमितित्वशाब्दत्वादिपरिग्रहः तत्र हि जन्यज्ञानं व्याप्तिज्ञानं अतिदेशवाक्यार्थज्ञानं पदज्ञानादि तज्जन्यं अ-
नुमित्यादि तन्मात्रवृत्ति अनुमितित्वादि तच्छून्यत्वं साक्षात्कारत्वमित्यर्थः अत्र च ज्ञानत्वं साक्षात्कारत्वमित्युक्तौ अनुमित्यादावतिव्याप्तिरतः शून्यान्तं ज्ञा-
तिशून्यज्ञानत्वं साक्षात्कारत्वमित्युक्तौ असंभवः ज्ञानत्वादिजातेरेव तत्र सत्त्वादित्यतो जन्यधीजन्यमात्रवृत्तीति जातिविशेषणं ज्ञानत्वस्य च ज-
न्यधीजन्यभिन्ने ईश्वरसाक्षात्कारे निर्विकल्पके च वृत्तित्वान्न तन्मात्रवृत्तित्वमिति नासंभवः जन्यप्रधीजन्यवृत्तीत्युक्तावपि तथा ज्ञानत्वादेर्जन्यधी- निर्वि कल्पक
जन्यसविकल्पकवृत्तित्वादतो मात्रेति जन्यधीजन्यभिन्नावृत्तित्वे सति जन्यधीजन्यवृत्तित्वं च तन्मात्रवृत्तित्वं चाक्षुषत्वादिजातेरपि धीजन्यमात्र- द्वि १९ द्वितीय
वृत्तित्वादव्याप्तिरतः प्रथमजन्यपदोपादानं तस्य च जन्यज्ञानाजन्यनिर्विकल्पकवृत्तित्वान्न तन्मात्रवृत्तित्वं जन्यजन्यमात्रवृत्तीत्युक्तावपि निर्विक

चाक्षुषत्वादेः

त्मकस्य जन्यशरीरादिजन्यत्वेन चाप्रसिद्धत्वादेर्जन्यजन्यमात्रवृत्तित्वाद्व्याप्तिरतो धीपदोपादानं जन्यधीमात्रवृत्तीत्युक्तावपि चाक्षुषत्वस्य त
न्यज्ञानमात्रवृत्तित्वाद्तो द्वितीयजन्यपदोपादनं जन्यमात्रवृत्तीत्युक्तावपि तथैवात्यतो धीति धीमात्रवृत्तीत्युक्तौ ज्ञानत्वमादायासंभव इति समुदितमु
पात्तं जन्यधीजन्यमात्रवृत्तिधर्मशून्यत्वमित्युक्तौ सविकल्पकत्वस्य तन्मात्रवृत्तित्वेनाव्याप्तिरतो जातिपदं सविकल्पकत्वं तु न जातिः चा
क्षुषत्वादिना संकरात् समवायसंबंधावच्छिन्नजातिशून्यत्वं चात्र बोध्यं अन्यथा कालिकादिसंबंधेनानुमितित्वादेरपि प्रत्यक्षादौ सत्वेनासंभवापत्ते
त्ते एतदर्थमेव च जातिपदं घटादावतिव्याप्तिवारणाय ज्ञानत्वमिति ननु उपदानप्रत्यक्षस्य कार्यमात्रहेतुतया कपालविषयकोपादानप्रत्यक्ष
रूपजन्यज्ञानजन्यमात्रवृत्ति घटत्वादिजातिसत्वात्तत्र नातिव्याप्तिरिति चेन्न सर्गादौ कुलालादीन्स्वयं ईश्वरेणैव घटोत्पादनादीश्वरकपालप्रत्य
क्षस्य जन्यतया घटत्वादेर्जन्यधीजन्यमात्रवृत्तित्वाभावात् घटादावतिव्याप्तिसंभवात् सामान्यादावतिव्याप्तिसंभावाच्चेति दिक् नि
दिध्यासने तूपलक्षणं कार्ष्णिमरणस्य तेनारकोपदेशजज्ञानेऽप्यपि द्रष्टव्यं निदिध्यासनेत्यादिना जन्यधीजन्यमात्रवृत्तित्वं सूचितं ननु
तत्वसाक्षात्कारत्वं श्रवणादिप्रयोज्यात्मविषयकशरीरादिभिन्नत्वप्रकारकसाक्षात्कारत्वं न तु विशिष्टस्यानतिरेकात्साक्षात्कारत्वमेव तत्त्व
न जन्यधीजन्यमात्रवृत्तीति कुतोऽव्याप्तिरित्यत आह मोक्षेति तथा च मुक्तित्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया सिद्धस्य त

तर्क० १२ 12

त्वज्ञानवृत्तिवैजात्यस्य निदध्यासनादिजन्यमात्रवृत्तित्वात्तद्भिन्नत्वाभावेनाव्याप्तिरिति भावः मानसेति तथा च मानसावृत्ति अनुमितित्वादिकमेव
तद्भिन्नत्वस्य सत्त्वान्नाव्याप्तिरिति भावः इदमुपलक्षणं आराध्यत्वप्रकारकज्ञानरूपभक्तिवृत्तिभक्तित्वं फलाभावरूपं भावनिश्चयरूपश्रद्धात्वरूपजात्या श्रद्धाहि
र्जन्यधीजन्यमात्रवृत्तित्वान्मानसावृत्तीति जातिविशेषणमावश्यकमेवेति ध्येयम् ननु मानसत्वं मनोजन्यत्वं तथा चानुमितित्वादेरपि मान
सावृत्तित्वाभावादनुमित्यादावतिव्याप्तिः न च तादृशजात्यप्रसिद्धिः देवदत्तप्रनवच्छेदकप्राद्वृत्तिजातेरेव तादृशत्वादित्यत आह मानसत्वे चे
ति ननु मानसत्वस्य जातित्वे प्रमाणाभाव इत्यत आह आस्तां विस्तर इति आत्ममानसत्वावच्छिन्नं प्रति विजातीयमनःसंयोगत्वेन हेतुत
या तज्जन्यतावच्छेदकतया मानसत्वजातिसिद्धिरिति भावः वैशिष्ट्यानवगाहिज्ञानं निर्विकल्पकं तदेव साक्षात्कारः अयं घट इति वैशिष्ट्य
विषयक इति शेषः घटत्वाघत्लीकेति तन्मते अनुगतधर्मो घटत्वादितरेतराभाववृत्तिरूप एव व्यावृत्तिः अन्योन्याभावः अभावस्तन्मते
तुच्छः अलीक इति यावत् तथा चाभावरूपघटत्वस्यालीकस्य वैशिष्ट्याभावात् सदसतोः संबंधाभावात् विशिष्टोऽप्यलीक एव असद्वि
षयकं च ज्ञानं भ्रम इति सविकल्पकं ज्ञानं भ्रमः निर्विकल्पके च घटत्वादेरभानात्परमार्थिकविषयकत्वेन तत्रैव साक्षात्कारत्वप्रमेति अर्थे १२
जस्यैव प्रत्यक्षत्वादिति भावः बाधकं विनेति विषयविसंवाद एव हि भ्रमत्वे बाधकः यथा शुक्तौ रजतत्वस्य प्रकृते च घटत्वस्याविसंवाद एवेति

भावः ननु विषयविसंवादस्य बाधकत्वं न ब्रूमः अपि त्वलीकविषयत्वस्य तन्निष्ठोऽत्रेह न चेति अलीकत्वासिद्धेरिति अभावत्वस्यापि घटा
दिपदार्थवदनुभूयमानतयाऽलीकत्वमसिद्धमिति कुत अतद्व्यावृत्तिरूपघटत्वस्यालीकत्वं एवं च घटव्यावृत्तिरित्यत्र घटभिन्नं यत्किंचि
वत्प्रतियोगिकभेदस्य पटेऽपि सत्त्वात् घटभिन्नं यावत् तद्व्यक्तिमत्त्वावच्छिन्नभेदकूट एव घटत्वं वाच्यं तथा च यावत्प्रतियोगिज्ञानाभावा
त् घटत्वबुद्धेरुच्छेद एव स्यात् यदि च भावत्वेनाभावज्ञान एव प्रतियोगिज्ञानापेक्षा अत्र च स्वरूपत एव घटत्वज्ञानान्नानुपपत्तिरितिभो
विद्यते तथापि घटत्ववानिति बुद्धेरुच्छेदापत्तिः तत्र घटत्वत्वेन घटत्वस्य ज्ञानात्तस्य च नञर्थतया यावत्प्रतियोगिज्ञानं विनाऽसंभवादिति किं
चातद्व्यावृत्तिभिन्नस्यैव घटत्वादेरूपत्वं ज्ञानाभावत्वरूपत्वमिति कुतः अलीकत्वसंभावनेति भावः यद्वाऽऽदिनिरीश्वरानंगीकारेण तज्ज्ञानस्य
सुतरामसंभवितेन साक्षात्कारस्यैकविधात्वमेवांगीक्रियत इत्यरुचेस्तन्मतं निराकर्तुमाह स चेति कार्यमात्रं प्रत्युपादानप्रत्यक्षस्य हे
तुतया परमाण्वादिरूपोपादानप्रत्यक्षं विना द्व्यणुकादिरूपकार्यस्यानुत्पत्त्यापत्त्या ईश्वरस्य प्रत्यक्षमंगीकर्तव्यः तथा च तज्ज्ञानसत्त्वेन द्वैविध्य
मेव तस्येति भावः द्वैविध्यमेव विवृणोति नित्य इत्यादिना नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं सत्यंतनिवेशान्न ध्वंसे
अतिव्याप्तिः प्रागभावेऽतिव्याप्तिवारणाय च विशेष्यदलनिवेशः अनित्यत्वं च प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वं वा अन्य इति जगव

तर्क० त्संबंधघ्वन्य इत्यर्थः अस्मदादिसाक्षात्कार इति यावत् तत्र निर्विकल्पकसविकल्पकयोर्मध्ये वैशिष्ट्यानवगाहीति वैशिष्ट्यविषयताशून्यज्ञानत्वमित्यर्थः विशेषणज्ञा
१३ नसंपन्नमर्थं घटत्वविषयकत्वमावश्यकं व्यक्तिज्ञानमंतरा जातिज्ञानासंभवात् तत्तद्घटविषयकत्वमपि न स्यागीक्रियते वैशिष्ट्यविषयकत्वं तु न किंचित्सा
13 धकमिति वैशिष्ट्यानवगाहित्वं अस्तु तं सविकल्पकेच वैशिष्ट्यस्यापि विषयत्वान्न तत्रातिव्याप्तिरिति भावः न सिंहाकारकज्ञानस्वीकारे तु तन्निरूपि
तवैशिष्ट्यविषयताशून्यज्ञानत्वं तन्निर्विकल्पकत्वमिति ध्येयम् ननु चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपकारणबलात् घटघटत्वयोर्ज्ञानवत् चक्षुः
संबंधविशेषणतारूपकारणबलात्तत्संबंधस्यापि ज्ञाने बाधकाभावः प्रतिबध्यप्रतिबंधकभावकल्पने च गौरवं तथा चेदं लक्षणमसंभवग्रस्तमित्य
त आह निराकारं चेति निष्प्रकारकं चेत्यर्थः क्वचित्तथैव पाठः वस्तुतस्तु वैशिष्ट्यानवगाहीत्यस्य संसर्गमर्यादया वैशिष्ट्यानवगाहीत्यर्थः वैशिष्ट्य
निष्ठसांसर्गिकविषयताशून्यत्वं तत्त्वमिति निष्कर्षः ननु प्रकारतासामान्यशून्यत्वे विशेष्यतासामान्यशून्यमपि लक्षणं कर्तुं शक्यते · एवेति · तत्कथं नोक्त
मित्यत इष्टापत्त्या तथैवाह निराकारं चेति निष्प्रकारकं निर्विशेष्यकं चेत्यर्थः वाकारश्चात्राव्यवस्थितविकल्पे द्रष्टव्यः इति पुनर्निर्व्यलीकः पंथाः ननु अयं घट इ
तिज्ञाने अत्र घटत्वेनेमं जानामीत्येवानुव्यवसायस्तत्र च वैशिष्ट्यस्य तृतीयार्थत्वे घट(व)विशिष्टविषयकज्ञानवानहमिति प्रकारत्वस्य तृतीयार्थत्वे च घटत्वप्रकार १३
कज्ञानवानिति तदाकारस्तथा च तादृशानुव्यवसायबलात्सविकल्पकस्य प्रत्यक्षसिद्धत्वेपि निर्विकल्पकस्यानुव्यवसायगम्यत्वाभावात् न तत्र प्रत्य

क्षे प्रमाणं नाप्यनुमानमप्रयोजकत्वादिति मीमांसकमतं द्वदिस्थीकृत्य शंकते नचेति निर्विकल्पकं चेत्यर्थः प्रत्यक्षसिद्धमनुव्यवसायात्मकप्रत्यक्षप्रमि
तिगम्यं अभ्युपगमादिति नैयायिकैरिति शेषः अनुमेयं अनुमानगम्यं तच्चायं घट इत्याकारकः जन्यत्वे घटत्वविशिष्टसाक्षात्कारः जन्यघटत्वज्ञान
पूर्वकः जन्यघटत्वविशिष्टज्ञानत्वात् यद्यद्विशिष्टज्ञानं भवति तत्तज्ज्ञानपूर्वकं भवति इति सामान्यमुखव्याप्तौ दंडी पुरुष इति प्रत्यक्षं दृष्टान्तः नन्वत्र कार्य्या
कारणभावादिरूपानुकूलतर्काभावादप्रयोजकत्वमित्यत आह तथाहीत्यादि जन्येति जन्यतद्विशिष्टज्ञानत्वावच्छिन्नं प्रति जन्यतद्विशेषणज्ञानत्वेन हे
तुत्वमिति कार्य्यकारणभाव एवानुकूलतर्क इति भावः घटत्वज्ञानादूं विशिष्टज्ञानवारणाय जन्यदं तत्प्रभावः नित्यव्यावर्त्तनाय च कार्यतावच्छेदके जन्यत्वप्रवे
शः नित्यस्य स्वरूपयोग्यस्य तत्फलाव्यभावइति नियमात् कारणतावच्छेदकेपि जन्यत्वप्रवेशः वस्तुतस्तु सामानाधिकरण्यप्रत्यासत्त्यातस्य हे
तुत्वबोधनाय कारणतावच्छेदके जन्यत्वनिवेशनमिति बोध्यं निर्विवादमिति यथा च न विवादस्तथोपरिष्टाद्वक्ष्यते तथा च कार्य्यकारणभावरू
पानुकूलतर्कसत्त्वान्नाप्रयोजकत्वमनुमानस्येति भावः पक्षे हेतुं गमयति भवति चेति धारावाहिकस्थले द्वितीयादिविशिष्टज्ञानस्य पूर्वपूर्वविशि
ष्टज्ञानजन्यत्वसंभवान्न निर्विकल्पकसिद्धिरित्यतः प्राथमिक इमिति तत्रापि घटविशिष्टज्ञानेपि ननु घटत्वप्रकारकं ज्ञानमेवांगीक्रियतामित्याशंक्या नि
रावष्टे नचेति तदानीं प्राथमिकघटत्वविशिष्टज्ञानपूर्वं ज्ञानादिति तथा च विशेषणमिति विना तस्य न विशिष्टज्ञानत्वमिति भावः तत इति विशेषण

ज्ञानं

०तर्क० ज्ञानाभावेन तस्य विशिष्टज्ञानत्वाभावादित्यर्थः तदिति घटत्वविषयकं ज्ञानमित्यर्थः ननु वैशिष्ट्यानवगाहिघटत्वविषयकज्ञानसिद्धावपि न निर्विक
१४ ल्पकसिद्धिरित्यत आह तदेव चेति अनन्यथासिद्धनियतपूर्ववर्त्तिन एव कारणत्वाज्ज्ञानांतरीयघटत्वविशिष्टज्ञानस्य पूर्ववर्त्तित्वादेव कारणत्वमस्त्वित्या
14 शंकते न चेति अव्यवहितेत्यादि नहि पूर्ववर्त्तित्वमात्रं कारणत्वघटकं अपि तु अव्यवहितपूर्ववर्त्तित्वं तच्च न तत्रेति भावः कार्य्यमात्रं प्रति ज्ञानत्वेन हेतु
त्वादीश्वरीयज्ञानस्यैव हेतुत्वमस्त्वित्याशंकते न चेति तज्जनकं घटत्वविशिष्टज्ञानजनकं सामानाधिकरण्येति एकस्य दंडज्ञाने गुरुपांतरस्य दं
१८ ड विशिष्टज्ञानं द्वारेण यत्समवायसंबंधेन तद्विशिष्टबुद्धिं प्रति समवायसंबंधेन तद्विशेषणज्ञानस्य हेतुत्वमिति सामानाधिकरण्य प्रत्यासत्त्या
तस्य हेतुत्वेन भगवज्ज्ञानं हेतुत्वमिति भावः व्यधिकरणत्वात् अस्मदीयघटत्वविशिष्टज्ञानव्यधिकरणत्वात् तत्र कारणमिति घटत्ववि
शिष्टानुभवे कारणमित्यर्थः तदेव स्मरणात्मकं विशिष्टज्ञानमेव पूर्वानुभवस्य समवायसंबंधेन स्मरणपूर्वमसत्वाद्विशिष्टज्ञानत्व
स्य विशेषणज्ञानकार्य्यतावच्छेदकत्वेन विशिष्टानुभवत्वमेव कार्य्यतावच्छेदकं वाच्यमित्याह विशिष्टानुभवेहीत्यादिना ननु स्मरणे
पीति ननु विशिष्टस्मरणेऽपि तेन विना विशेषणज्ञानेन विना तदुपपत्तेरिति विशिष्टस्मरणोपपत्तेरित्यर्थः कदाचिदपि दंडज्ञानाभावे १४
संस्काराभावेनैव दंडविशिष्टस्मरणाभावात् तत्र विशेषणज्ञाने हेतुत्वस्य निरर्थकत्वात् पूर्वानुभवस्य विनष्टत्वात् विशेषणज्ञानस्य स्मरणजन

कर्त्वसंभवाच्चेति भावः ननु पूर्वानुभवस्य नष्टत्वात् स्मरणजनकत्वासंभवे ऽपि विशिष्टस्मरणमेव स्मरणपूर्वं कल्पनीयमित्यत आह अन्यथेति अन्य
था विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानस्य हेतुत्वे पूर्वमनुभवस्यासत्वात् तज्जनकमपि स्मरणमेव वाच्यं एवं तत्रापि स्मरणांतरमित्यनवस्थाइ
त्यर्थः नन्वनुभवत्वजातौ मानाभावेन स्मृत्यन्यज्ञानत्वरूपस्य तन्निवेशे गौरवात् विशिष्टज्ञानमात्रे विशेषणज्ञानस्य हेतुत्वेन विशिष्टस्मरणं प्रत्यपि
विशेषणज्ञानं हेतुः न चानवस्था तत्पूर्वं निर्विकल्पकात्मकस्मृतेरेवोपगमात् न च ममापि घटत्वविशिष्टानुभवपूर्वं घटत्वविशिष्टस्मरणस्य तत्पूर्वं
२४ च घटत्वनिर्विकल्पकस्य कल्पनेन न दोष इति वाच्यं तत्पूर्वं ज्ञानद्वयकल्पने गौरवात् तदपेक्षया घटत्वनिर्विकल्पकानुभवस्यैव स्वीकर्तुमुचितत्वादित्य
त आह अस्मृतेरेवेति तथा सति ममापि घटत्वविशिष्टानुभवपूर्वं घटत्वनिर्विकल्पकस्मरणमेव कल्प्यत इति न ज्ञानद्वयकल्पने गौरवमिति
भावः न च निर्विकल्पात्मकस्मृतिस्वीकारान्निर्विकल्पात्मकं ज्ञानं सिद्धमेवेति किं विवाद इति वाच्यं तथापि निर्विकल्पानुभवस्यासिद्धत्वादिति
नि ननु निर्विकल्पात्मकं स्मरणमेवानुपपन्नं तद्विशेष्यकतत्प्रकारकस्मृतिं प्रति तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन हेतुत्वात् जायमानं सप्रकारकमे
व स्यात् ननु निष्प्रकारकमिति चेत् तद्विषयस्मृतिं प्रति तद्विषयकसंस्कारत्वेनापि सामान्यकार्यकारणभावकल्पनात् विशेषणज्ञानं विना जाय
मानं निर्विकल्पकमेव जायत इति दिक् ननु सर्वत्र विशिष्टानुभवपूर्वं विशिष्टस्मरणस्य निर्विकल्पकात्मकस्मरणस्य वा हेतुत्वकल्पनेन

॰तर्क॰ १५ 15

स्मरणेऽनुभवः कारणं तदनुभवे च स्मरणांतरमित्यनवस्था किंच पूर्वाननुभूतपदार्थस्याद्यानुभवे स्मरणमेव कारणं वाच्यं तच्च न संभवति तज्जनका
नुभवाभावात् जन्मांतरीयेणानुभवादेव स्मरणोपगमे च जन्मांतरानुभूतानां घटादिपदार्थानामपि स्मृतिप्रसंगादिति चेन्न आद्यानुभवजनकस्मर
णस्य जन्मांतरीणानुभवादेवाभायत्वाददृष्टविशेषोद्बोधकसहकृतादुपपत्तेः न च घटादिस्मृतिप्रसंग तत्र फलोपधायकैरभावेनादृष्टस्योद्बोधक
त्वाकल्पनात् अनवस्थायाः प्रामाणिकत्वेनादुष्टत्वादिति निर्विकल्पिचिदेतत् तत्संभवात् स्मरणासंभवात् ननु दृष्टविशेषरूपोद्बोधकसंदे
शात् जन्मांतरीणानुभूतं चैत्रमपि स्मर्यतामित्यत आह नहीति पूर्वमिति जन्मांतरइत्यर्थः अनुभूतमिति चैत्रत्वादिजातेतच्छरीरवृत्तित्वे
न चैत्रशरीरस्य च जन्मांतरेऽभावेन तद्वृत्तिचैत्रत्वादेर्ग्राहकाभावादनुभवासंभवेन न स्मृतिसंभवः तत्स्मरणस्य तदनुभवपूर्वकत्वनियमादि
तिभावः ननु प्रयोजकोऽयं नियमो नादरणीय इत्यत आह नचेति तस्यानुभवस्य तद्धेतुत्वात् स्मरणहेतुत्वात् तथा च स्मृतित्वावच्छिन्नं प्रत्य
नुभवस्य हेतुत्वात् तादृशनियमस्याप्रयोजकत्वमिति भावः न च ईदृशकार्यकारणभावे मानाभाव इति वाच्यं तथा सति कदाचिदप्यननुभू
तस्यानुभूतस्य वा तदंशे उपेक्षात्मकज्ञानविषयस्य स्मरणापत्तेरुपेक्षान्यज्ञानत्वेन तद्धेतुताया आवश्यकत्वात् न च संस्काराभावान्नैवमा १५
पत्तिरिति वाच्यं संस्काररूपव्यापारद्वारा तस्यापि हेतुत्वात् व्यापारेण च व्यापारिणोऽन्यथासिद्ध्यभावेन संस्कारेणानुभवान्यथासिद्धेरसं

नवात् उपजीव्यविरोधाच्च तथाहि आशुविनाशिनः कालांतरभाविफलं प्रतिकारणत्वं व्यापारं विनानुपपन्नमित्यनुपपत्तिज्ञानात् चिरध्वस्ता
नुभवस्य कालांतरीयस्मृतिहेतुत्वोपपत्त्यर्थं व्यापारे कल्पनीये संस्कार एव व्यापारः कल्प्यत इति अनुभवस्य कारणत्वमुपजीव्यैव संस्कारसिद्धि
रिति ननु तर्हि कॢप्तत्वादनुभवध्वंसस्य व्यापारत्वमास्तां कृतमकॢप्तसंस्कारकल्पनेन न च कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबंधकत्व
पदार्थत्वात् स्मृतिकारणीभूतानुभवध्वंसप्रतियोगित्वस्यानुभवे सत्वान्न प्रतिबंधकत्वापत्त्यानन्तस्य तद्धेतुत्वमिति वाच्यं प्रतिबंधकसंसर्गैर्वत्वे भाग
नैव कार्यमात्रहेतुतया संसर्गाभावत्वावच्छिन्नकारणताया एव प्रतिबंधकशरीरघटकत्वात् स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावत्वावच्छि प्रतियोगिनिष्ठधर्म

प्रतियोगि निष्ठः न्नकारणतावच्छेदको यो धर्मस्तद्वत्त्वस्यैव प्रतिबंधकत्वपदार्थत्वात् तद्धर्मावच्छिन्नकार्यतानिरूपिताभावत्वावच्छिन्नकारणतानिरूपितस्वावच्छि
प्रतियोगिताकत्वसंबंधावच्छिन्नावच्छेदकताकधर्मवत्त्वस्य तद्धर्मावच्छिन्नप्रतियोगिताकत्वपदार्थत्वादिति निष्कर्षे तथा चानुभवध्वंसस्य ध्वंसत्वे
न कारणतयाऽभावत्वेनाकारणत्वान्न प्रतिबंधकत्वापत्तिरिति चेन्न तर्हि सर्वांशोपेक्षात्मकज्ञानादपि स्मरणापत्तेः अस्मन्मते चोपेक्षान्यज्ञानत्वेन संस्का

उपेक्षान्यज्ञानत्वेन रहेतुतया तदभावादेवास्मरणात् न च स्मरणं प्रत्येव तेन रूपेण हेतुत्वमस्तु कृतमंतर्गडुना तेन संस्कारेणेति वाच्यं उपेक्षात्वस्यैकस्याभावेन तत्
तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटस्यैव निवेशनीयतया स्मृतिजनकतायां सर्वांशोपेक्षाभेदांशिकोपेक्षाभेदानामेकत्र निवेशप्रसंगे

अंशिकोपेक्षायाः संस्कारजनकत्वेपि न स्मृतिजनकत्वम् सर्वांशोपेक्षायाः संस्कारजनकत्वं स्मृतिजनकत्वमपि नः

तर्कं० १६ न तेषां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावानां त्रयसंभवात् मन्मते च संस्कारजनकतावच्छेदककोटौ सर्वांशोपेक्षाभेदानां
अंशिकोपेक्षाभेदानां च स्मृतिजनकतावच्छेदककोटौ निवेशनेन च तेषामनिवेशात् तथा च एवमस्वरसं दुस्तरमेवेति संस्कारसिद्धेरावश्यकत्वादिति कृतं प
16 पल्लवितेन॥ ननु प्रमेयवान् इत्यनुभवे प्रमेयत्वेन चैत्रत्वविशिष्टस्यापि एवमनुभूततया दृष्टविशेषस्य च प्रमेयत्वांशे उद्बोधकताकल्पनेन के
वलं चैत्रत्वविशिष्टस्मरणोपपत्तिः तदंशे अन्याप्रकारकस्मृतिं प्रति तदंशे अन्याप्रकारकत्वेन तु नानुभवस्य हेतुत्वं जातिमान् इत्यनुभावोत्तरं स्म
घट इति स्मरणापत्तेः घटजातित्वांशे उद्बोधकाल्लाभस्याकल्पनेनैवंकारणात् उद्बोधकत्वाभावात्तयोः फलोन्नेयत्वादिति अनयैव च रीत्याऽ
दृष्टद्वारत्वादि मनःपदादिशक्तिग्रहोपीत्यत आह किंचेति न स्मृतमिति उद्बोधकविरहादिति शेषः विशिष्टज्ञानसामग्र्यभावात् घटत्वज्ञान
रूपघटत्वप्रकारकज्ञानसामग्र्यभावात् साक्षात्कारसामग्रीतः चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपचाक्षुषप्रत्यक्षसामग्रीतः साक्षात्का
रोत्पत्तौ चाक्षुषोत्पत्तौ न चैतावता साक्षात्कारोत्पत्तावपि न निर्विकल्पकसिद्धिरित्यत आह तदेव चेति घटत्वज्ञानस्यान्यकाले जायमानं प्रत्यक्ष
मेवेत्यर्थः अस्माकं नैयायिकानां निर्विकल्पकमिति तथा च घटत्वज्ञानाभावात् जायमानं घटत्वेज्ञाने निष्प्रकारकमेव न विष्यतीति सिद्धं नि १६
र्विकल्पात्मकज्ञानमिति भावः ननु रक्तो दण्डो न वेति संशये रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिज्ञानानुदयाद् विशिष्टवैशिष्ट्यावगाहिबु

मि

द्धिं प्रति भावः ननु स्फोटं दंडो न वेति संशये विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुताया आवश्यकत्वात् अत एव दंडज्ञानमन्यकाले दंडविशिष्टपुरुषज्ञानानुत्प
त्तिनिर्वाहे अलं विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया न च विशिष्टस्य वैशिष्ट्यमिति न्यायेन विषयताशालिबुद्धिं प्रत्येव विशेषणतावच्छेदकप्रकारकनिर्णय
स्य हेतुत्वेन दंडज्ञानमन्यकाले विशेष्ये विशेषणं तत्रापि च विशेषणान्तरमिति न्यायेन रक्तविशिष्टज्ञानापत्तिवारणाय तद्धेतुत्वमावश्यकमिति वाच्यं तथा तथात्वे हेतो
रेवेति न्यायेन विशेषणविशेष्येन्द्रियसन्निकर्षादेव विशिष्टप्रत्यक्षोपपत्तेः अनुमित्यादौ तु परामर्शादेरेव नियामकत्वाशयेन मीमांसकस्याशंकते नन्वि
ति हेतुतासिद्धौ विशिष्टज्ञानं प्रति हेतुतासिद्धौ सर्वमेतत् निर्विकारादिसाधनं एव स्यात् स्वोक्तन्यायेन सयुक्तिकं स्यात् तत्रैव चेति विशेषणज्ञानस्य
विशिष्टज्ञानहेतुत्वे प्र एवेत्यर्थः मानमिति विशेषणविशेष्येन्द्रियसन्निकर्षादेव तदुपपत्तेस्तत्र प्रमाणाभाव इत्यर्थः प्रमाणाभावस्य च प्रमेयाभावव्याप्य
त्वादिति भावः अन्वयव्यतिरेकाभ्यामिति विशेषणज्ञानसत्त्वे विशिष्टज्ञानं विशेषणज्ञानाभावे विशिष्टज्ञानाभाव इत्येवंरूपान्वयव्यतिरेकाभ्यामित्य
र्थः तदवधारणात् विशेषणज्ञानस्य विशिष्टबुद्धिहेतुत्वावधारणात् यथान्वयव्यतिरेकाभ्यां दंडे कारणत्वग्रहस्तथा प्रकृतेऽपीति भावः ननु केव
लमन्वयव्यतिरेकावेव कारणताग्राहकौ अतिप्रसंगात् अपि त्वनन्यथासिद्धावन्वयव्यतिरेकावेव प्रकृते च विशेषणविशेष्येन्द्रियसन्निकर्षेण
विशेषणज्ञानस्यान्यथासिद्धत्वान्न तथाविधयोस्तयोः संभव इत्यत आह विस्तरस्त्विति अनुसंधेय इति कदाचित् घट इति स्वरूपतो घटत्वप्रकार

तर्कं०
१२
17

कज्ञानस्य कदाचिज्जातिमानिति जातित्वरूपेण घटत्वप्रकारकज्ञानस्योत्पत्तिरिति नियमनिर्वाहाय स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो घटत्वज्ञानत्वे
न जातित्वेन घटत्वविशिष्टबुद्धिं प्रति च जातित्वेन घटत्वज्ञानस्य हेतुतया विशेषणज्ञानस्य हेतुतासिद्धिः अथ घटत्वज्ञानसत्त्वेपि कदाचिदयं घट इत्याका
रकघटत्वप्रकारकज्ञानस्य कदाचिच्चायं घटत्ववानित्याकारकघटत्वविशेष्यकज्ञानस्योत्पत्त्या तन्निर्वाहाय तत्तज्ज्ञाने अदृष्टविशेषस्यैव
नियामकत्वकमावश्यकं तथा च प्रकृतेपि अदृष्टविशेषेणैव तथाविधकदाचित्कज्ञानद्वयोपपत्तेरलं विशेषणज्ञानहेतुतयेति चेत् नैवं तत्रगत्यन्त
राभावेनादृष्टस्य नियामकत्वकल्पनेपि प्रकृते दर्शिततरीत्या गतिसंभवेऽदृष्टविशेषस्य नियामकत्वकल्पनायाश्चान्याय्यत्वात् एकत्रादृष्टस्य नियाम
ककल्पनादन्यत्रापि तस्यैव नियामकत्वकल्पने कार्यकारणभावमात्रोच्छेदापत्तेरिति ननु तथापि स्वरूपतो घटत्वविशिष्टबुद्धित्वं नाम घटत्वांशेऽन्या
प्रकारकबुद्धित्वं तत्र च जातित्वादिभासकसामग्रीसत्त्वे जायमानं ज्ञानं घटत्वांशेऽन्यप्रकारकमेवोत्पद्यते तदंशे जातित्वादिभासकसामग्र्या सत्त्वे च घट
त्वांशेऽन्याप्रकारकमेव ज्ञायत इति तादृशधर्मस्य नीलेतरघटत्वादिपदार्थसमाजग्रस्तत्वेन जन्यतानवच्छेदकत्वात्कथं तादृशज्ञानं प्रति स्वरूपतो घटत्वज्ञा
नस्य हेतुत्वं कल्पयित्वा विशेषणज्ञानहेतुत्वसिद्धिरिति चेन्न जातित्वभासकसामग्रीसत्त्वेपि जातिमान् घट इति स्वरूपतो घटत्वविशिष्टबुद्ध्युदयात् ९७
घटत्वांशे निरवच्छिन्नप्रकारताशालिज्ञानत्वमेव स्वरूपतो घटत्वविशिष्टबुद्धित्वं तदवच्छिन्नं प्रति च स्वरूपतो घटत्वज्ञानस्य हेतुत्वकल्पनं विनाऽनुपपत्तिरि

रणासंभवादिति ननु नित्याव्यावृत्तेनायं जन्यत्वविशिष्टज्ञानत्वमेव विशेषणज्ञानकार्यतावच्छेदकं वाच्यं तत्र च जन्यत्वं ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगि
त्वं वा कालिकसंबंधेन घटत्वादिमत्त्वं वेत्यत्र विनिगमनाविरहादिति चेन्न नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वे क्षतिविरहात् अन्यथैवं कारणत्वानुपप
त्तिः कारणत्वं हि कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणदेशनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तत्र घटाधिकरणकपाले यत्कि
ञ्चिद्घटाव्यवहितपूर्वक्षणावच्छेदेन दंडाभावसत्त्वात्कारणत्वानुपपत्तिरिति तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्कार्याधिकरणवृत्त्यभावप्रतियो
गितानवच्छेदकधर्मवत्त्वं वाच्यं तथा सति घटत्वावच्छिन्नं प्रति रासभत्वेनापि कारणत्वप्रसंगः यत्किंचिद्घटाव्यवहितपूर्वक्षणावच्छेदेन कपाले तस्य स
त्त्वात् तथा च कार्यतावच्छेदकावच्छिन्नयावद्व्यक्तीस्तत्तद्व्यक्तित्वेन घटत्वात् तत्तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्तत्कार्याधिकरणवृत्त्यभावेत्येव वाच्यं ए
वं च नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे कार्यतावच्छेदकावच्छिन्नयावन्मध्ये नित्यव्यक्तेरपि प्रविष्टतया तदव्यवहितपूर्वक्षणाप्रसिद्धेरिति चेन्न कार्यका
रणभेदेन कारणताया भिन्नतया प्रकृते नित्यव्यक्त्यतिरिक्तव्यक्तीनामेव तत्तद्व्यक्तित्वेनोपादानात् तत्साधारणरूपेण कार्यत्वेपि कारणत्वे बाधक
।भावात् एवं समवायकालिकविशेषणतोभयसंबंधेन विशिष्टज्ञानत्ववत्तस्य कार्यतावच्छेदकत्वेन नित्यसाधारण्याभावाच्च वस्तुतस्तु जन्यप्र
त्यक्षमात्रवृत्तिवैजात्यं स्वीकृत्य विजातीयविशिष्टज्ञानस्यैतत्कार्यतावच्छेदकत्वात् चाक्षुषत्वादिना संकरभयाच्च निर्विकल्पकेपि तद्वैजात्यस्वी

०तर्कं०
१८
18

कारः अत एव तज्जन्यधीजन्यमात्रवृत्तिएतादृशवैजात्यस्याव्याप्यत्वाभावाज्ज्ञानसाक्षात्कारे प्रागुक्तसाक्षात्कारलक्षणस्याव्याप्तिरिति परास्तं तस्य निर्विकल्पकसाधा
रणेन तज्जन्यधीजन्यमात्रवृत्तित्वाभावात् मानसवृत्तित्वाभावाच्च तल्लक्षणे तु मानसवृत्तित्वे न ज्ञाने विशेषणीयत्वादित्युक्तत्वादिति दिक् निर्विकल्पकं निरूप्य
क्रमप्राप्तं सविकल्पकं निरूपयति वैशिष्ट्यावगाहीति संबंधविषयकमित्यर्थः ननु इंद्रियसंबद्धविशेषणतारूपकारणबलात् निर्विकल्पकेपि संबंधमाने
बाधकाभावात् तस्यापि वैशिष्ट्यावगाहित्वमस्तीत्यतिव्याप्तिरित्यस्वरसादाह सप्रकारकं चेति किंचिन्निष्ठप्रकारताशालीत्यर्थः निर्विकल्पके च प्र
कारतया घटत्वादेरभानान्नातिव्याप्तिरिति भावः वस्तुतस्तु वैशिष्ट्यावगाहीत्यस्य संसर्गमर्यादया वैशिष्ट्यावगाहीत्यर्थः किंचिन्निष्ठसांसर्गिकवि
षयताशालित्वमिति पर्यवसितोर्थः ननु किंचिन्निष्ठप्रकारताशालित्वमित्यपि वक्तुं शक्यत एवेति तत्कुतो नोक्तमित्यत इष्टापत्त्या तथैवाह सप्रकारकमि
ति इदमुपलक्षणं किंचिन्निष्ठविशेष्यताशालित्वमित्यपि बोध्यं ननु सप्रकारकमित्यत्र प्रकारत्वनिवेशात् किं तत्प्रकारत्वमित्यतस्तन्निरूपयति प्रकारता चेति
ज्ञाने इति निरूपितत्वं सप्तम्यर्थः घटत्वादेरिति निष्ठत्वं षष्ठ्यर्थः ज्ञाननिरूपितो घटत्वनिष्ठो विषयताविशेष इत्यर्थः विषयताविशेष इति विशेष्यताख्यवि
षयताप्रकारताख्यविषयतासांसर्गिकविषयतारूपत्रिविधविषयताभेद इत्यर्थः ननु किं तद्विषयत्वमत आह विषयता चेति विषयेति घटो ज्ञानवि १८
षयः पटो ज्ञानविषय इत्यनुगतप्रतीतिसाक्षिक इत्यर्थः स्वरूपसंबंधविषय इति ज्ञानविषयरूपस्वरूपसंबंध इत्यर्थः ननु विषयतायाः स्वरूपसंबंध

त्वांगीकर्त्तृप्राचीनमतेतस्याज्ञानस्वरूपत्वंविषयस्वरूपत्वंवा नतावदाद्यः ज्ञानरूपघटत्वतलत्ववृत्तिविषयतयोरैक्येनघटवद्भू
तलमितिज्ञानोत्तरंघटनिष्ठप्रकारतानिरूपितत्वतलनिष्ठविशेष्यताशालिज्ञानवानहमित्याद्यनुव्यवसायवद्भूतलनिष्ठप्रकारता
निरूपितघटनिष्ठविशेष्यताशालिज्ञानवानहमित्यनुव्यवसायापत्तेः घटपटावितिसमूहालंबनज्ञानस्यभ्रमत्वापत्तेश्च तद्धान
स्यैक्येनतत्स्वरूपघटपटादिविषयतायाश्चाभेदेनघटत्वानावच्छिन्नविशेष्यतानिरूपितघटत्वनिष्ठप्रकारताशालिज्ञानत्वरूप
भ्रमत्वस्यतत्रभ्रमत्वात् नद्वितीयः घटत्वतलसंयोगाःघटवद्भूतलमितिसमूहालंबनविशिष्टबुद्ध्योर्विषयाणामैक्येनविषयकृत
वैलक्षण्याभावाद्विषयताकृतमेववैलक्षण्यंवाच्यं तत्रचविषयतायाविषयस्वरूपत्वेतत्स्वरूपाणांतासामपिवैलक्षण्याभावात्स
मूहालंबनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तिःसंयोगरूपैकैव नचसमूहालंबनाविषयस्यघटप्रतियोगिकत्वतलानुयोगिकत्वस्व
रूपसंबंधसंबंधस्यापिविशिष्टबुद्धिविषयत्वान्नवैलक्षण्यानुपपत्तिरितिवाच्यं घटत्वतलसंयोगप्रतियोगित्वानुयोगित्वानीतिसं
बंधसंबंधविषयकस्यापिसमूहालंबनस्यसंभवात् नचसमूहालंबनेसंयोगत्वेनसंयोगाभानान्नानुपपत्तिरितिवाच्यं घटवद्भू
तलंसंयोगश्चेतिविशिष्टज्ञानस्यतादृशसमूहालंबनाद्वैलक्षण्यानुपपत्तिरितितस्याःस्वरूपसंबंधरूपत्वंदुर्वचमित्यतआह

दार्थांतरमिति तथाचातिरिक्तायाविषयतायाविषयभेदेनभिन्नतयाननुगतत्वेनोक्तानुपपत्तिरितिभावः केचित्तु स्वरूपसंबंधरूपाया
विषयतायाअननुगमेनानुगतप्रत्ययानुपपत्तिरित्यत आह पदार्थांतरमितीत्याहुः तदसत् तस्याअतिरिक्तत्वेपितत्तद्विषयभेदेनभिन्न
तयाअननुगतप्रत्ययानुपपत्तितादवस्थ्यात् नचानुगतप्रत्ययानुपपत्तिः कथंवारणीयेतिवाच्यं विषयतात्वमेकमंगीकृत्यतस्यैवेदं घ
टत्वविशिष्टबुद्धिंप्रतिघटत्वविशिष्टयकज्ञानत्वेनहेतुतायांविषयतायाः प्रकारताविशेष्यत्वादिभेदेनभिन्नतयाएकस्यानिवेशेऽन्य
विधविषयताशालिज्ञानाद्विशिष्टबुद्ध्युत्पत्त्यापत्तिरपिनिरस्ता तत्रविषयतात्वेनप्रकारताविशेष्यतयोरननुगमेनानुपपत्त्यभावादि
त्यास्तांविस्तरः घटंजानामीत्यादौज्ञानजन्यंघटनिष्ठंज्ञाततारूपंपदार्थांतरमंगीकार्यं अन्यथाघटस्यकर्मत्वानुपपत्तेः क्रियाजन्य
फलशालित्वस्यैवकर्मत्वरूपत्वात् तत्रचज्ञानंनिमित्तकारणंसमवायिकारणंचघटः तदेवचविषयत्वमितिनिष्कृष्टंमहमतमादर्शी
येति नद्यास्त्विति ज्ञानजन्यः निमित्तकारणविधयाज्ञानजन्यः विषयनिष्ठइति समवायेनविषयवृत्तिरित्यर्थः सैवचज्ञाततेव
वच संबंधस्वरूपेति अतिरिक्तसंबंधस्वरूपेत्यर्थः युक्तंसयुक्तिकं एतज्ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदार्थांतरांगीकरणं अस्य
पेति ज्ञानजन्यविषयनिष्ठैज्ञाततारूपपदार्थानंगीकरिइत्यर्थः ज्ञानकर्मत्वमिति घटंजानीतीत्यादौघटादेः क्रियाजन्यफलशा १९

त्तित्वरूपं कर्मत्वमित्यर्थः क्रियेति ज्ञानरूपधात्वर्थजन्यफलवत्त्वाभावादित्यर्थः विनष्ट इति घटस्य नष्टत्वे नतत्र ज्ञानजन्यज्ञाततायाः
असंभवादिति भावः नोवोपपाद्यति नहीति तत्र विनष्टे घटे तस्यैव घटस्यैव असत्वात् नष्टत्वात् ननु यथा मनसा नष्टे घटे विवि
षयतासंवंधेन ज्ञानमुत्पाद्यते तथा ज्ञानेनापि तत्र तदुत्पादने वाधकाभावदुत्पद्यतश्चाह नचेति समवायिकारणस्य कार्यसहभावेन हे
तुत्वान् घटनाशेन तदुत्पत्तिसंभवः अन्यथासमवायिकारणनाशस्य समवेतनाशहेतुत्वात् ज्ञाततोत्पत्तिद्वितीयक्षण एव तस्या
नाशापत्त्या क्षणिकत्वप्रसंग इति भावः ननु तत्र विषयताया ज्ञाततारूपत्वाभावेपि स्वरूपसंवंधरूपत्वमेवास्त्वामित्याशंकते तते त्या
दिना तत्र नष्टघटस्थले प्रतीतेः ज्ञातो घट इति प्रतीतेः अन्यत्रापीति विद्यमानघटस्थलेपीत्यर्थः स एवास्त्विति स्वरूपसंवधरूप
विषयतास्त्वित्यर्थः अधिकेनेति स्वरूपसंवंधातिरिक्तज्ञाततास्वविषयत्वस्वीकारेणेत्यर्थः ननु सर्वत्र स्वरूपसंवंधस्य विषयत्व
रूपत्वे तस्य ज्ञानजन्यत्वाभावात् घटस्य क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेन कर्मणि द्वितीयेति सूत्रेण घटं जानातीत्या
दौ घटपदोत्तरं द्वितीयाविभक्त्यनुपपत्तिरित्याशंक्याह कर्मविभक्तेरपीति द्वितीयाविभक्तेरपीत्यर्थः नष्ट एव नष्टघटस्थलवदेवत
था च तथा घटस्थले घटपदोत्तरं द्वितीयोपपत्त्यर्थं गौणमुख्यसाधारणकर्मत्वविशिष्टपरत्वं द्वितीयेति सूत्रस्य कर्मपदस्यावश्यमे

गीकार्य्यमप्यापि तत्तेनैव विद्यमानघटस्थले पि घटपदोत्तरं द्वितीयोपपत्तिरिति भावः एवं च क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेपि
स्वविषयकवाचकधातुसमभिव्याहारस्थले विषयकत्वरूपं गौणमेव कर्मत्वमिति नानुपपत्तिरिति हृदयं ननु तन्मतेऽभावो ज्ञात इति
प्रतीत्याऽभावेपि ज्ञाततायाअवश्यमंगीकारात् समवायिकारणं विनाभावकार्यत्वस्थलं नवइति ननियमस्तथा च नष्टघटस्थ
लेपि नानुपपत्तिरित्यत आह संक्षेप इति समवायस्यातिरिक्तस्यानंगीकारात् विलक्षणस्वरूपसंबंधेन स्वाश्रयत्वमेव समवायि
कारणत्वं एवं च विलक्षणसंबंधेन स्वाश्रयं विना स्वस्यानुत्पत्तिरित्येव नियमः अभावस्थले च विलक्षणसंबंधेन स्वाश्रयत्वमभा
वस्यांगीक्रियते विलक्षणसंबंधेन स्वाश्रयघटस्यासत्त्वाच्च नष्टघटस्थलेऽप्यनुपपत्तिर्जागरूकैवेति भावः स्वमताविष्टत्वेनेदं दूष
णमित्यकेचित् वस्तुतस्तु गौणकर्मत्वेनाप्युपपत्तेरतिरिक्तज्ञाततायां प्रमाणाभावात् तद्रूपत्वं विषयतायामित्येतत्त्वदूषणं सारं
प्रकारतान विषयताविशेषः किंतु प्रतियोगित्वमेवेत्यंगीकर्तृणां केषांचिन्मतमाह अन्येत्वित्यादिना भासमानं वैपद्वैशिष्ट्यं संबंधः
तन्नप्रतियोगित्वमित्यर्थः पुरुष इति ज्ञानेपीदं दण्डस्वप्रकारत्वापत्तिः संयोगप्रतियोगित्वस्य दंडे सत्वादतो भासमानेति तज्ज्ञानेव दंडप्रति १०
योगिकसंयोगस्याभानान्नातिव्याप्तिः प्रतियोगित्वं च स्वरूपसंबंधविशेष एव इदमेव संगमयति अयमिति घटत्वस्य वैशिष्ट्यं घटत्व

निरूपितः समवायः संयोगो द्वीति वस्तुगत्या ज्ञायमानो यः संयोगस्तत्प्रतियोगित्वस्य दंडे सत्वात्प्रकारत्वापत्तिरित्यर्थः ननु तत्प्रतियो
गिकत्वेन ज्ञायमानं यद्वैशिष्ट्यं तत्प्रतियोगित्वमर्थः समूहालंबनविशिष्टबुद्ध्योर्भेदानुपपत्त्या विशिष्टज्ञाने प्रतियोगित्वानुयोगित्वरू
पसंबंधसंबंधोपि ज्ञायत इत्युपेयते समूहालंबने च दंडप्रतियोगिकत्वेन संयोगस्याज्ञानान्नातिव्याप्तिरित्यत आह दितिहि तथापि दंड
पुरुषदंडप्रतियोगिकसंयोगादिति समूहालंबनेप्यतिव्याप्तिः न चात्र दंडप्रतियोगिकत्वस्य संबंधसंबंधविधया न ज्ञानमिति वाच्यं तथास
ति सांसर्गिकविषयताया अतिरिक्तत्वानुपगमे किमपराद्धं प्रकारताख्यसंबंधसंबंधस्य विशिष्टज्ञानविषयत्वे गौरवं च विषयकृतवैल
क्षण्याज्ञानेपि विषयताकृतवैलक्षण्येनैव ज्ञानानां वैलक्षण्योपपत्तेरित्याद्यूह्यं तच्चेति साक्षात्कारिरूपप्रमाकरणं चेत्यर्थः तृतीयानु
व्यवसायरूपप्रमाकरणत्वस्य व्यवसायेसत्वात् हानोपादानोपेक्षादिप्रमाकरणत्वस्य निर्विकल्पके सत्वात्सविकल्पात्मकादिरूपप्र
माकरणत्वस्य चक्षुरादिसंयोगे सत्वात्तस्य बहुविधत्वमिति मतनिराकरणायाह इंद्रियात्मकमिति चक्षुरादिकमेव प्रत्यक्षं प्रमा
णं अन्येषां तु व्यापारवत्वमिति भावः वस्तुतस्तु प्रत्यक्षप्रमात्वमनिराकरणाय इंद्रियेति द्रव्याह ग्राह्यकत्वद्रव्यविषयकलौकि
कसाक्षात्कारजनकतावच्छेदकधर्मवत्वं तेनोपनीतज्ञानमादायन रसनेंद्रियादावतिव्याप्तिप्रसंगः अनुपधायकखंडचक्षुःसंग्रहाय

तर्कौ॰ जनकतावच्छेदकधर्मस्यान्यत्वं तेनानुपधायकस्वं चक्षुषि नातिप्रसंगः तत्रापि चक्षुषस्य सत्वादिति अन्यत्तद्रव्यग्राहकेतरत् नन्वंधस्य घ
२१ टसन्निकर्षे स्पार्शनं जायत एवेत्यतः विप्रकृष्टेति विदूरवर्तीत्यर्थः ततमनः आत्ममात्रग्राहकमिति तथा च मनसः आत्मनिष्ठग्राहकत्वान्न
21 तेन घटादिग्रहापत्तिरिति भावः सर्वेति मनःसर्वविषयकज्ञानजनकमिति सिद्धान्तसंगादित्यर्थः सर्वविषयकमपि सर्वविषयकज्ञान
जनकमपि तथा च न तादृशसिद्धान्तसंग इति भावः परतंत्रमिति स्वेतरबहिर्विषयकज्ञानजनकसामग्रीसापेक्षमित्यर्थः तथा चांधस्य
विप्रकृष्टघटादीनां मनसा न ग्रहापत्तिः तत्सहकारिचक्षुरोरभावादिति भावः किं तत्परमत आह परमिति मीमांसकैः सामान्यलक्ष
णायोगजधर्माद्यस्वीकारान्मनसश्चक्षुरादीन्द्रियमात्रसहकारित्वमेवोपेयते आत्मनएवात्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन इन्द्रिया
णां वस्तुप्राप्यकारित्वनियमादिति संगच्छते इति तन्मतं निराकर्तुमाह न पुनरिति चक्षुरादिमात्रमिति चक्षुरादिकमेव परमिति न पु
नरित्यन्वयः मात्रपदेन ज्ञानलक्षणादिव्यवच्छेदः तथा च चक्षुरादिव्यापारं विनापि ज्ञानलक्षणादिसहकारेण कदाचिन्मनसा ज्ञानजन
नात्तेषामपि सहकारित्वमावश्यकमुपदर्शितनियमस्तु लौकिकप्रत्यक्षस्थल एवेति भावः ननु ज्ञानलक्षणसहकारेण मनसा ज्ञानजनने २१
मानाभाव इत्यत आह स्मृतेति संसर्गेति परस्परं संबंधग्रहादित्यर्थः ननु परस्परं संसर्गाग्रहे का क्षतिरत आह कथमन्यथेति अन्यथा ज्ञा

ग
नेलक्षणसहकारेण मनसास्मृतपदार्थानां परस्परं संसर्गाग्रहे इत्यर्थः कविकाव्यादीति कविनास्मृतिविषयीभूतपदार्थानां परस्परं संसर्ग
हे केव्यविरच्यते नान्यथा वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात् तथा च दृते स्वीकारे संसर्गग्रहाभावेन काव्यरचनोच्छेदप्रसंग इति स्वीकारस्यावश्य
क इति भावः इदमुपलक्षणं लौकिकसन्निकर्षं विनापि घटो नास्तीत्यादौ प्रभावांशे घटस्य भानात् एवं सौरभे लौकिकसन्निकर्षं विनापि
सुरभिचन्दनमिति चाक्षुषोदयाच्च तत्स्वीकारस्यावश्यकत्वमिति ध्येयं लौकिकान्यविषयताशालिप्रत्यक्षत्वावच्छिन्नं प्रति किंचिद्विषय
तावच्छिन्नतन्निष्ठविषयताशालिज्ञानत्वेन हेतुतेति कार्यकारणभावो बोध्यः कार्यतावच्छेदके लौकिकान्यत्वनिवेशात् प्राथमिकवि
शिष्टबुद्धौ लौकिकसन्निकर्षजन्यनिर्विकल्पके च न व्यभिचारः कारणतावच्छेदके किंचिद्विषयतावच्छिन्नत्वनिवेशाच्च न निर्विकल्पको
त्तरमुपनीतभानापत्तिः निर्विकल्पकस्याप्युपनायकत्वांगीकारे तु तद्विषयताशालिज्ञानत्वेनैव हेतुतेति बोध्यं सामान्यलक्षणजन्य
ज्ञाने व्यभिचारवारणं तव्यवहितोत्तरत्वसंबंधेन कारणवैशिष्ट्यनिवेशेनैव तद्वृत्तिधर्मप्रकारकज्ञानाजन्यत्वानिवेशे तद्वृत्तिघटत्वद्रव्यत्वादि
रूपनानाधर्मप्रकारकज्ञाननिरूपितजन्यतानामननुगमकरूपाभावादिति इत्थं च कार्यतावच्छेदके लौकिकान्यत्वानिवेशेऽपि न
क्षतिरिति ध्येयं योगजधर्मे सामान्यलक्षणप्रत्यासत्तिस्वीकारेऽनुमेव मे प्रमाणयति योगिनामित्यादिना योगिनां योगजधर्मसह

तर्क०
२२

कारेण मनसा चक्षुरादिव्यापारं विनापि सर्वविषयकालौकिकसाक्षात्कारोदयात्तस्य सहकारित्वमावश्यकमिति भावः मेयत्वादिनेति सर्वत्र प्र
मेये चक्षुरादिव्यापारं विनापि प्रमेयत्वेन प्रमेयसामान्यविषयकालौकिकसाक्षात्कारोदयात्तस्यापि सहकारित्वमावश्यकमिति भावः स्वतंत्रमिति
बहिर्विषयकज्ञानजनकसामग्र्यनपेक्षमित्यर्थः अबाह्येति आबाह्यविषयकज्ञानजनने इत्यर्थः अबाह्यानीति योग्यानीति शेषः तद्योग्येति आ
त्मयोग्यगुणा इत्यर्थः तदभावः योग्यगुणाभावः तद्वृत्तीति आत्मतत्समवेतयोग्यगुणवृत्तिजातिमित्यर्थः सा च त्मत्वज्ञानत्वादिः तदेकत्वेति आ
त्मैकत्वपरममहत्परिमाणे चेत्यर्थः द्रव्यसाक्षात्कारसामग्रीसत्वे तद्वृत्तिसंख्यापरिमाणादिग्राहकसामग्र्या अपि सत्वात् द्रव्यसाक्षात्कारस्य सं
ख्यापरिमाणविषयकत्वनियमेन आत्ममानसे तयोरपि भानसंभवतीति भावः नयोग्य नलौकिकमानससाक्षात्कारविषयीभूते इत्यर्थः
अत्र च मनस्संयुक्तसमवायरूपकारणबलात् ज्ञानादीनामिव तयोरपि मानसे बाधकाभावः न च तत्र यथा सति संस्कारादीनामपि मानसापत्तिः
सामग्रीसत्वाविशेषादिति वाच्यं तत्र ज्ञानायत्वासंस्कारस्य प्रातिस्विकरूपेण विजातीयगुणत्वेन वा प्रतिबंधकत्वकल्पनात्तद्वत्संख्यापरिमाणयोरपि
प्रातिस्विकरूपेण प्रतिबंधकत्वे प्रतिबंधकतावच्छेदकवैजात्यस्वीकारे वा गौरवात्तत्सत्वेन किंचिद्बाधकं न च ज्ञानादियोग्यगुणेष्वेव संस्कार २२
व्यावृत्तं वैजात्यं स्वीकृत्य विजातीयगुणविषयकमानसं प्रति विजातीयगुणत्वेन हेतुत्वात् आह शेषे जात्यस्य तत्संख्यापरिमाणयोः स्वीकारे गौरवान्नभो

रप्ययोग्यत्वमिति वाच्यं मनस्संयुक्तसमवायेन विजातीयगुणं विनाप्यात्मत्वमानसजननाद्विजातीयगुणस्य विशेषसामग्रीत्वासंभवे
न सामान्यसामग्रीत्वात्संस्कारप्रत्यक्षापत्तिः कारणाय विजातीयगुणभेदत्वेन हेतुताया आवश्यकत्वादात्मत्वमनसे आत्मत्वत्वेनापि
हेतुत्वं कल्पयित्वा सामान्यासामग्र्याः फलजननीये विजातीयगुणात्मत्वत्वयोरन्यतरस्य सहकारित्वकल्पनेन संस्कारप्रत्यक्षापत्तिवा
रणेत्वति गौरवात् तदपेस्य विजातीयगुणभेदत्वेन कारणताया एवौचित्यादिति तयोः प्रत्यक्षस्वीकार एवोचित इत्यस्वरसः टीकाकृत इत्य
नेन सूचितः इत्यमिति आत्मनः आत्मसमवेतगुणानां च मनसो योग्यत्वे इत्यर्थः परात्मा पुरुषांतरीयात्मा तद्गुणस्य परसमवे
तगुणस्येत्यर्थः चकारेण गुणसमवेतजात्यादीनां द्वेतेषामभावानां च संग्रहः समाधत्ते नेति परायोग्यत्वादिति पुरुषांतरीयमनसोऽयोग्यत्वा
त् आत्ममात्रसत्त्वावच्छिन्नं प्रति विजातीयमनःसंयोगत्वेनात्मसमवेतमानसं प्रति विजातीयमनस्संयुक्तसमवायत्वेनात्मसमवेतसमवे
तमानसत्वावच्छिन्नं प्रति विजातीयमनस्संयुतसमवेतसमवायत्वेनेत्यादिना कार्यकारणभावकल्पनात्पुरुषांतरीयात्मान्यदीयमनसोसं
योगे च वैजात्यानभ्युपगमेन न तत्प्रत्यक्षापत्तिरिति भावः गत्यैरन्विति परमाण्वादिषु चक्षुःसंयोगसत्त्वादिति भावः तेषां परमाण्वादीनां चक्षु
रयोग्यत्वादिति चक्षुर्जन्यलौकिकसाक्षात्कारायोग्यत्वादित्यर्थः वक्ष्यमाणलौकिकचाक्षुषसामग्रीसत्त्वादिति भाव महदित्यादि

स्यवन्निलौकिकविषयतासंबंधेनचाक्षुषंप्रतिसमवायेनमहत्त्वेन एवमुद्भूतरूपत्वेनचहेतुतेत्यर्थः परमाणौमहत्त्वाभावात्आत्मनिरूपाभा
वात्पिशाचादेश्चोद्भूतरूपत्वाभावान्नतत्प्रत्यक्षमित्याखंडलार्थः तदेवाह परमाणुश्चेत्यादि तद्रूपस्यपिशाचादिरूपस्य अनुद्भूतत्वात् उद्भू
तत्विन्नत्वात् यद्यपिपिशाचादिशरीरस्यावयवीयत्वेनतत्ररूपाभावात्तद्रूपस्यानुद्भूतत्वादित्यसंगतं तथापिपिशाचादिपदेनतन्निमित्त
कारणपार्थिवोपष्टंभकभागोबोध्यः ननुतादृशवादिविजातीयचक्षुःसंयोगत्वेनैवद्रव्यचाक्षुषंप्रतिहेतुत्वंपरमाणवादिचक्षुःसंयोगेचवै
जात्याभ्युपगमान्नतत्प्रत्यक्षापत्तिरितिकिंमहदुद्भूतरूपादिहेतुतया नचविजातीयचक्षुःसंयुक्तविशेषणतायाअभावचाक्षुषहेतुत
यावायोउद्भूतरूपाभावप्रत्यक्षानुरोधेनतत्रविजातीयचक्षुःसंयोगस्यावश्यकतयावायोश्चाक्षुषापत्तिरितिरूपहेतुत्वमावश्यकमिति
वाच्यं द्रव्यचाक्षुषजनकतावच्छेदकतावच्छेदकतावच्छेदकतयावैजात्यांतरस्वीकारात्तस्यचतत्राअनंगीकारात् नचतथापिविजातीयच
क्षुःसंयुक्तविशेषणतायाअभावचाक्षुषहेतुतयावायोगस्यचक्षुष्यपिसत्त्वात्तच्चाक्षुषापत्तिरिसुद्भूतरूपहेतुत्वमावश्यकमितिवाच्यं स्व
प्रतियोगस्यस्वस्मिन्नभावेनचक्षुषिचक्षुःप्रतियोगिकसंयोगाभावादितिचेन्न विजातीयक्रियायाएवविजातीयसंयोगनियामकत्वेयत्रै २३
कचक्षुःक्रिययाघटेपरमाणौचयुगपत्संयोगःतत्रप्रथमाणावपिविजातीयसंयोगस्यदुर्वारतयातत्प्रत्यक्षापत्तेर्वारणासंभवात् नचत

23

तदुत्तरदेशस्यापि विजातीयसंयोनियामकतया परमाण्वादिरूपोत्तरदेशतत्रनियामकत्वाकल्पनेन नतत्रविजातीयसंयोग इति वाच्यं अनं
तोत्तरदेशानां विजातीसंयोगनियामकत्वकल्पनापेक्षया महदुद्भूतरूपादिहेतुताया एवोचितत्वादिति दिक्. एकेइत्यनेनास्वरसस्सूचितः स
चोद्भूतत्वस्य जातित्वे नीलत्वादिना संकरप्रसंगः नच नीलत्वादिव्याप्यनानैवोद्भूतत्वमिति वाच्यं तथा सति चाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपत्वे
नकारणत्वानुपपत्तेः कारणत्वाननुगमोनव्यभिचारादिति अनुद्भूतत्वेति नच नीलत्वादिना सांकर्यमत्रापीति वाच्यं नीलत्वव्याप्यनानानु
द्भूतत्वे स्वैवोपगमात् अनुद्भूतत्वाभावविशिष्टरूपत्वेन च प्रत्यक्षं प्रति हेतुत्वे न व्यभिचाराभावादिति भावः प्रसंगाच्चक्षुर्योग्यगुणमाह योग्यगु
णमित्यादिना योग्यद्रव्यरूपमिति चक्षुर्योग्यद्रव्यवृत्तिरूपमित्यर्थः तन्मात्रेति योग्यद्रव्यमात्रवृत्तीत्यर्थः ननु तन्मात्रवृत्तीत्यत्र मा
त्रपदमनर्थकमित्यत आह मात्रपरमिति घटाकाशसंयोगस्याकाशेपि वृत्तित्वान्न योग्यद्रव्यमात्रवृत्तित्वमिति भावः ननु त्वाचप्रत्यक्षे
त्वक्संयोगस्य हेतुत्वात्परमाणुवायुप्रभृतीनां स्पार्शनापत्तिरिति त्वगिन्द्रिययोग्यमेव द्रव्यं त्वाचग्राह्यतर इत्येवं वाच्यं तत्र किं तद्योग्यमि
तिहृदिस्थाशंकायामाह त्वचइति महदित्यादि तथा च द्रव्यवृत्तिलौकिकविषयतासंबंधेन त्वाचप्रत्यक्षं प्रति महत्त्वेनोद्भूतस्पर्शवत्त्वेन
च हेतुत्वान्न च तत्प्रत्यक्षापत्तिरिति भावः सामान्यतः बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपत्वेन हेतुत्वात्त्वाचप्रत्यक्षेपि रूपं हेतुः तेनन

वायोः प्रत्यक्षमितिहृदयं यथाक्रमं परमाण्वादिप्रत्यक्षं वारयति तेनेत्यादिना प्रमाया इति नच प्रभाहितेजसो रूपमित्यनेन प्रभा रूपत्वमेव न तु द्रव्यत्व
मिति वाच्यं तदन्यमतानुसारेणैव तदुक्तः त्वादिति प्रसंगात्त्वगिंद्रियगुणेनाह गुणश्चेत्यादिना त्वचो योग्या इति शेषः चक्षुषो योग्यस्य
रूपस्यापि त्वचा ग्रहणप्रसंगाद्रूपातिरिक्ता इति महदुद्भूतस्पर्शवन्मात्रेति तन्मात्रवृत्तित्वं च तदितरावृत्तित्वे सति तद्वृत्तित्वं महदुद्भूतस्पर्शश्चे
ति सामानाधिकरण्येन महत्त्वविशिष्टउद्भूतस्पर्शश्चेत्यर्थः ननु चक्षुषो योग्य इति व्यर्थमत आह अत एवेति अत एव चक्षुर्योग्यत्वविशेषणादे
व वायाविविति वायुपरिमाणस्य चक्षुषो योग्यत्वादिति भावः ननु उद्भूतस्पर्शवद्वृत्तिश्चक्षुर्योग्यगुणस्यैवाप्रसिद्धत्वे नैव तत्प्रत्यक्षापत्तिवा
रणे कृतं महदित्यादिविशेषणेनेत्यत आह नवेति तथा च प्रभापरिमाणस्य चक्षुर्योग्यत्वात्तस्य त्विता च प्रत्यक्षापत्तिरतस्तद्विशेषणमा
वश्यकमेवेति भावः न च चक्षुर्योग्यत्वविशेषणेनैव परमाणुगुणवारणेऽत्र पृथक् महदिति विशेषणं वैयर्थ्यमिति वाच्यं त्रुटिपरिमाणस्या
पि न वारणाय प्रकृष्टमहत्वपरतया तदुपादानस्यावश्यकत्वात् मात्रपदव्यावृत्तिमाह न वायवेति उद्भूतस्पर्शवन्मात्रवृत्तित्वादुद्भूतस्पर्श
वदितरवृत्तित्वात्तथा च न तदितरावृत्तित्वं तस्येति भावः तत्रहि प्रभायां हि कर्म चेति त्वग्योग्यद्रव्यसमवेतकर्मत्व योग्यत्वमित्यर्थः वायो
रपि स्पार्शनप्रत्यक्षत्ववादिमीमांसकमतं दर्शयति मीमांसकास्त्वित्यादिना लाघवात्त्वाच प्रत्यक्षे रूपस्य हेतुत्वाकल्पनेन लाघवात् म २४

हदिति महत्त्वविशिष्टोद्भूतरूपमित्यर्थः तत्र योजकं केत्वाच प्रत्यक्षप्रयोजकं गौरवात् प्रभायाः स्पार्शनवारणायोद्भूतस्पर्शहेतुत्वावश्यकतया
त्वाचप्रत्यक्षं प्रति रूपहेतुत्वा गौरवात् अत इति उद्भूतरूपस्य त्वाचप्रत्यक्षाप्रयोजकत्वादित्यर्थः बहिरिंद्रियेति आत्मप्रत्यक्षे व्यभिचारवार
णाय बहिरिंद्रियजन्यत्वनिवेशः अत एव न नित्यसाधारण्यमपीति भावः तदभावात् उद्भूतरूपाभावात् नन्वेवमिति न वायोः स्पार्शनप्रत्य
क्षमित्यर्थः लाघवादिति बहिरिंद्रियजन्यद्रव्यसाक्षात्कारत्वापेक्षया द्रव्यचाक्षुषत्वस्यैव कार्य्यतावच्छेदकत्वे लाघवादित्यर्थः अत्र मी
मांसकानामयमाशयः आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिंद्रियजन्यद्रव्यप्रत्यक्षत्वस्य कार्य्यतावच्छेदकत्वे गौरवात् उद्भूतरूपस्य
कार्य्यतावच्छेदकं बहिरिंद्रियजद्रव्यप्रत्यक्षत्वं वाच्यं तत्र च बहिष्ट्वं आत्मान्यत्वं वा मानसविषयान्यत्वं वेति विनिगमनाविरहात् अथ मू
र्त्तप्रत्यक्षत्वमेव तत्कार्यतावच्छेदकं स्पर्शसमवायिकारणतावच्छेदकतया च मूर्त्तत्वं जातिरिति चेत् तथापि प्रभायाः स्पर्शनवारणायो
द्भूतस्पर्शस्य स्पार्शनं प्रति हेतुत्वावश्यकतया चाक्षुषत्वमेव रूपजन्यतावच्छेदकमुपेयते न तु प्रत्यक्षत्वं वायोः प्रत्यक्षसंदेहेन तस्या
संदिग्धव्यभिचारकत्वात् तदुक्तं परित्यज्य च निश्चितव्यभिचारकं रूपं रस्यमाणव्यभिचारकेण कार्य्यत्वकल्पनाया अयोगादिति
तथा च वायोः स्पार्शने बाधकाभावः साधिका च समीरोयं मन्दो विहरतीत्यादिप्रतीतिः न चोद्भूतस्पर्शनवायोरनुगमाभावात् तादृशप्र

तीत्यनुपपत्तिरिति वाच्यं व्याप्त्यादिप्रतिसंधानं विनापि तादृशप्रतीतेर्ज्जायमानत्वात् अन्यथा घटं पश्यामीत्यादिप्रतीतेरनुमानादिनैवोपपत्तौ
घटीनांमपि स्पार्शनोच्छेदापत्तिरिति अत्राहुर्नैय्यायिकाः कारणाभावात्कार्य्याभाव इति प्रतीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वं
तत्र च मरूत्प्रत्यक्षत्वावच्छिन्नं प्रत्युद्भूतरूपत्वेनाहेतुत्वे प्रत्यक्षसामान्याभावे उद्भूतरूपाभावस्योद्भूतस्पर्शाभावस्येति विशेषाभावकूटस्य प्रयोजक
त्वं वाच्यमिति गौरवात् मन्मते चोद्भूतरूपाभावस्येति लाघवं उद्भूतरूपत्वेनाकारणत्वे च तदवच्छिन्नाभावस्य प्रयोजकत्वासंभवात् हेतुत्वमावश्य
कमेव ननु तथ्युद्भूतस्पर्शत्वे न हेतुत्वमादाय विनिगमनाविरहः नव्यमते वायोरिव मन्मतेपि प्रभायाः प्रत्यक्षांगीकारादिति चेन्न इह उपरि
देशे विहंगमस्त्यत्र प्रभामण्डलस्यैवोपरिदेशतया तस्य च प्रत्यक्षानंगीकारे इह विनिगम इति प्रतीत्यनुपपत्तेः संयोगप्रत्यक्षे यावदाश्रयप्र
त्यक्षस्य हेतुत्वात् एवं संयोगविभागलिंगकं चंद्रतारादेर्गत्यनुमानं न स्यात् न च पूर्वोत्तरदेशयोः चंद्रादेरूपलंभानुपलंभाभ्यां संयोग
विभागयोरनुमानात्तद्गत्यनुमानमिति वाच्यं प्रभामंडलरूपयोस्तयोः नव्यमतेऽप्रत्यक्षत्वात् तस्मात्प्रभायाश्चाक्षुषांगीका
रस्यावश्यकत्वात् उद्भूतस्पर्शत्वेन कारणत्वासंभवः न च मरूत्प्रत्यक्षत्वस्य नित्यसाधारणत्वात्कथं जन्यतावच्छेदकत्वमिति वाच्यं स २५
मवायकालिकविशेषणतोभयसंबंधेन प्रत्यक्षत्वस्य जन्यतावच्छेदकत्वात् एवं रीत्यासिद्धे कार्य्यकारणभावे वायोरूपाभावेन न

तस्यप्रत्यक्षमिति वायुर्वातीतिरनुमानादिनैवापपादनीया घटादौ चोद्भूतरूपसत्वेन तत्प्रतीतेः प्रत्यक्षत्वमेवेति ननु गगनघटसंयोगस्पार्श
नवारणाय विजातीयसत्स्पार्शनं प्रति सामानाधिकरण्यसंबंधेन स्पार्शनाभावस्य प्रतिबंधकत्वावश्यकत्वात् तथा वायोरस्पार्शने वायु
स्पर्शस्पार्शनानुपपत्तिः उद्भूतरूपस्पार्शनव्यभिचारवारणाय सति विजातीयत्वानिविष्टः वैजात्यं चेदं द्रव्यव्यावृत्तं गुणकर्मसाधारणं
न च प्रतिबध्यतावच्छेदककोटौ विजातीयसति स्पर्शान्यत्वनिवेशान्नानुपपत्तिरिति वाच्यं तथा सति विजातीयसत्वस्पर्शान्यत्वयोर्विशे
षणविशेष्यभावे विनिगमनाविरहप्रसंगात् एवं त्वक्संयुक्तसमवायरूपसामान्यसामग्र्याः स्पार्शनाभावाभावरूपकारणं विना
पि वायुस्पर्शस्पार्शनजननात्तस्य विशेषसामग्रीत्वासंभवेन त्वक्संयुक्तसमवायरूपसामान्यसामग्रीवलाद्गगनघटसंयोगस्पार्श
नापत्तेर्दुर्वारत्वाच्च न च स्पर्शस्पार्शनं प्रति स्पर्शत्वेनापि हेतुत्वं कल्पयित्वा सामान्यसामग्र्या द्रव्यसमवेतस्पार्शनत्वावच्छिन्ने जननी
ये स्पार्शनाभावाभावस्य स्पर्शयोरन्यतरस्य सहकारीत्वकल्पनान्नानुपपत्तिरिति वाच्यं तथा सति प्रतिबध्यतावच्छेदककोटौ स्पर्शा
न्यत्वनिवेशे न स्पर्शत्वेन हेतुत्वकल्पनेन च वायोरप्रत्यक्षत्वादिमते गौरवादिमते गौरवादिति वायुप्रत्यक्षत्वस्वीकार एवोचित इति
चेन्नैवं तादृशप्रतिबंधकाभावं विनापि त्वक्संयुक्तसमवायेन द्रव्यस्पार्शनजननात्तस्य विशेषसामग्रीत्वासंभवेन सामान्य

•तर्क• सामग्रीवलाद्गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वात् सद्भिन्नस्पार्शनं प्रति सद्भिन्नत्वेनापि कारणत्वं कल्पयित्वा सामान्यसामग्र्याः फलेजन
२६ नीयेतादृशप्रतिबंधकाभावसद्भिन्नयोरन्यतरस्य सहकारित्वकल्पनादापत्तिवारणे तु अतिगौरवात् तदपेक्षया गगनघटसंयोगस्पार्शनवारणा
26 य स्पार्शनाभावविशिष्टविजातीयसत्वेनैव तादात्म्येन प्रतिबंधकत्वौचित्यात् विजातीयसत्वे स्पार्शनाभाववैशिष्ट्यं च सामानाधिकरण्य
घटितसामानाधिकरण्यसंबंधेन नच विजातीयसत्वस्पार्शनाभावयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहः इति वाच्यं वि
जातीयसत्वविशिष्टस्पार्शनाभावत्वेन प्रतिबंधकत्वे सामानाधिकरण्यस्यैव प्रतिबंधकतावच्छेदकसंबंधतया गौरवात् स्पार्शना
भावविशिष्टविजातीयसत्वेन प्रतिबंधकत्वे तु तादात्म्यस्यैव प्रतिबंधकतावच्छेदकतया लाघवात् प्रतिबध्यतावच्छेदकं च स्पर्शान्य
स्पर्शान्यत्वं तेन वायोरप्रत्यक्षत्वेपि न तत्स्पर्शस्पार्शने व्यभिचारः नच तादृशप्रतिबंधकाभावं विनापि वायुस्पर्शस्पार्शनज
ननात्तस्य विशेषसामग्रीत्वासंभवेन सामान्यसामग्रीवलाद्गगनघटसंयोगस्पार्शनापत्तिरिति वाच्यं स्पर्शस्पार्शनं प्रति स्पर्शत्वे
नापि हेतुताकल्पनेन सामान्यसामग्र्याः फलेजननीये स्पर्शतथाविधप्रतिबंधकाभावयोरन्यतरस्य सहकारित्वोपगमात् नच २६
प्रतिबध्यतावच्छेदककूटे स्पर्शान्यत्वनिवेशात् स्पर्शत्वेन हेतुत्वकल्पनेन च वायोः प्रत्यक्षत्वानंगीकारे गौरवात् वायुप्रत्यक्ष

तानंगीकारे प्रकारांतरेण लाघवासंभवात् तथाहि परमाण्वादिघटितसन्निकर्षबलात् द्रव्यत्वस्पार्शनवारणाय द्रव्यसमवे
तस्पार्शनं प्रति त्वक्संयुक्तस्पार्शनं (प्रति त्व) त्वसमवायत्वेन हेतुत्वं वाच्यं तत्र च त्रसरेणुकस्पार्शने व्यभिचारवारणाय द्रव्यान्यद्र
व्यसमवेतस्पार्शनत्वं कार्यतावच्छेदकमुपेयं तस्य च सद्भिन्नद्रव्यसमवेतस्पार्शनत्वस्य कार्यतावच्छेदकत्वमादाय विनिगम
नाविरहः वायोरप्रत्यक्षत्वे तु वायुस्पार्शने व्यभिचारेण द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वस्य कार्यतावच्छेदकतासंभवेन सद्भिन्न
द्रव्यसमवेतस्पार्शनत्वस्यैव कार्यतावच्छेदकतया विनिगमनाविरहासंभवात् नन्वेवमसन्निकृष्टगुणकर्मस्पार्शनापत्ति
रिति वाच्यं एकाश्रयघटितसन्निकर्षात् त्वक्त्वादिप्रत्यक्षवारणाय विजातीयसत्स्पार्शनं प्रति सामानाधिकरण्यसंबंधेन त्वक्संयोगा
भावस्य प्रतिबंधकत्वावश्यकतया तेनैवासन्निकृष्टगुणकर्मस्पार्शनापत्तिवारणसंभवात् न चैवं त्वक्संयुक्तसमवायहेतुता।
यामेव बीजाभावः येन तत्कार्यतावच्छेदके विनिगमनाविरहः वायुप्रत्यक्षत्ववादिमते प्रसज्येतेति वाच्यं असन्निकृष्टद्रव्यत्वादि
स्पार्शनवारणाय त्वक्संयुक्तस्पार्शनवत्समवायत्वेन सद्भिन्नद्रव्यसमवेतस्पार्शनत्वावच्छिन्नं प्रति हेतुता तत्र च द्रव्यान्यद्रव्य
समवेतस्पार्शनत्वमादाय न विनिगमनाविरहः वायोरप्रत्यक्षत्वेन वायुस्पर्शस्पार्शने व्यभिचारात् वायुप्रत्यक्षत्ववादिमते तु

०तर्क० द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादायविनिगमनाविनिगमनाविरहेणानंतपुरुषभेदभिन्नानंतसन्निकर्षहेतुत्वकल्पनापत्ते
२७ र्वायोरप्रत्यक्षत्वांगीकारएवोचितः एतन्मतेउक्तरूपेणस्पार्शान्यत्वनिवेशेनस्पार्शत्वेनहेतुत्वकल्पनेनचकियद्दोषसंजनेपिपुरुष
भेदभिन्नसन्निकर्षहेतुत्वकल्पनेपि तयालाघवानपायादितिसिद्धांतानुयायिपंथाः नव्यास्तु असन्निकृष्टद्रव्यत्वस्पार्शनवार
27 णायपुरुषभेदभिन्नसन्निकर्षहेतुत्वंनोपेयते अपितुसद्भिन्नसमवेतस्पार्शनंप्रतिस्ववृत्तिप्रागभावप्रतियोगित्वविशिष्टस्वव
त्तिस्पार्शनेविषयतासंबंधेनतद्द्रव्यत्वसमवेतत्वसंबंधेनवृत्तित्वेनैवकारणतेस्ववृत्तित्वंचकालिकसंबंधेनएवंचवायुप्रत्यक्षत्व
स्वीकारेपुरुषभेदभिन्नसन्निकर्षहेतुत्वपर्यंतत्कार्यतावच्छेदकेउपदर्शितगौरवस्यानवकाशःतद्धेतुत्वस्यैवाकल्पनात् नचवृ
त्तिकार्यतावच्छेदकेद्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादायविनिगमनाविरहसंजनवदितिवाच्यं नव्यमतेस्पार्शान्यत्वनिवेशेनस्पार्श
त्वेनहेतुत्वकल्पनेनचगौरवस्यानिस्फुटत्वात् वस्तुतस्तु व्यापकधर्मेणकारणतायाद्रवकार्यतायाअपिअकल्पनात् द्रव्यान्य
द्रव्यसमवेतस्पार्शनत्वेनकार्यतावच्छेदकतायांसंजनवात्सद्भिन्नस्पार्शनत्वस्यैववायुप्रत्यक्षतावादिमतेपिसन्निकर्षकार्यतावच्छेदक २१
त्वादित्याहुः वस्तुतस्तु गुरुत्वाद्यतींद्रियप्रत्यक्षवारणायतेषांतत्तद्व्यक्तित्वेनप्रतिबंधकत्वेगौरवाल्लाघवेनविषयत्वेनैवलौकिकप्रत्य

क्षहेतुत्वं विषयत्वं च लौकिकविषयतया साक्षात्कारवत्त्वमेव तथा च तेनैव गगनघटसंयोगस्पार्शनवारणेन तदनुरोधेन स्पार्शनं प्रति स्पार्श
नाभावप्रतिबंधकत्वमिति न वायुस्पर्शस्पार्शनानुपपत्तिः नन्वेवं विषयत्वाभावादेव नीलरूपप्रत्यक्षवारणे रूपहेतुत्वमनावश्यकमिति वाच्यं घ
टादेः पाकादिना नीरूपतादशायां लौकिकप्रत्यक्षतापत्तेः रूपहेतुत्वस्यावश्यकत्वादित्यलमनल्पजल्पनेन समवायातींद्रियत्ववादिवैशेषिक
तं दूषयितुं तन्मतमुपन्यस्यति वैशेषिकास्त्विति न प्रत्यक्षः नेंद्रियजन्यलौकिकसाक्षात्कारविषयः संबंधप्रत्यक्षे इति संबंधत्वस्य समवा
यसाधारणत्वादिति भावः ननु तादृशकार्यकारणभावे मानाभाव इत्यत आह कथमन्यथेति अन्यथा तादृशकार्यकारणभावकल्प
नेन प्रत्यक्ष इति तत्रापि चक्षुःसंयुक्तसमवायरूपकारणसत्त्वेन द्रव्यसमवेतचाक्षुषापत्तेरिति भावः नचेति नहीत्यर्थः तथा हेतुतया
मिति संबंधप्रत्यक्षे परवदाश्रयप्रत्यक्षत्वेन हेतुतायामित्यर्थः घटाकाशसंयोगप्रत्यक्षापत्तिरेव मानमित्याशंक्य निराचष्टे नचेत्यादि
योग्येति द्रव्यत्वादिजातेर्योग्यमात्रसमवेतत्वाभावाद्योग्यत्वं न स्यादतो गुणस्येति योग्यत्वादिति घटाकाशसंयोगस्य चायोग्याकाश
वृत्तित्वेनायोग्यत्वादिति भावः नन्वेवं वायुस्पर्शस्य शब्दस्य च प्रत्यक्षं न स्यात् तयोरयोग्यवृत्तित्वादित्यत आह किंचेति लाघवात् संबंधप्र
त्यक्षत्वापेक्षया लाघवात् लाघवमेवाह संबंधत्वं हीति संयोगत्वस्य जातिरूपतया लाघवमस्त्येवेति भावः घ्राणग्राह्यगुणमाह

तर्क घ्राणग्राह्य इति गन्धत्वे गंधवृत्तिसामान्यं गंधत्वादिः तयोः गंधत्वयोः अत एव गंधमेहत्वसामानाधिकरण्यविशेषणादेव उद्भूतत्वविशेषणेना
२८ वृत्तिमाह नवेति रसनयोग्यगुणमाह रसनेति श्रवणयोग्यगुणमाह श्रवणेति ननु चक्षुरादीनां द्रव्यग्राहकत्वे निमीलितनयनस्यापि
28 तद्ग्रहापत्तिरत आह तस्य चेति सन्निकृष्टार्थग्राहकत्वात् सन्निकृष्टार्थमात्रग्राहकत्वात् असन्निकृष्टार्थाग्राहकत्वादिति यावत् स
हिकारणः प्रत्यक्षे जननीयेऽपेक्षणीयाः तथा चेन्द्रियसंयोगादेरपि प्रत्यक्षहेतुतया न निमीलितनयनस्य प्रत्यक्षापत्तिरिति भावः ननु इं
द्रियत्वस्य तेजस्त्वादिना संकराज्जातित्वासंभवेन कथं द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति इंद्रियतत्संसर्गयोर्हेतुत्वमिति चेन्न इंद्रियनिष्ठ
षकत्वेषु वैजात्यं स्वीकृत्य विजातीयैकत्वषट्वेनैव तद्धेतुत्वात् न च चक्षुःसंयोगदशायां स्पार्शनवारणाय त्वक्संयोगदशायां च चाक्षुष
वारणाय चक्षुस्त्वक्संयोगयोगाश्चाक्षुषस्पार्शनाहेतुत्वावश्यकतयेन्द्रियसंयोगादेः प्रत्यक्षसामान्यहेतुत्वे मानाभाव इति वाच्यं प्र
त्यक्षसामान्यानुन्यादे चक्षुःसंयोगाभावत्वक्संयोगाभावादीनां प्रयोजकत्वे गौरवात् लाघवेनेन्द्रियसंयोगाभावस्यैव प्रयोजकत्वेने
न्द्रियसंयोगहेतुत्वावश्यकत्वात् अकारणविरहस्य कार्यविरहाप्रयोजकत्वात् इन्द्रियसंयोगस्य संयोगेनेन्द्रियस्य वा हेतुत्वमिति विनि
गमनाविरहादिन्द्रियत्वेनापि तद्धेतुत्वमिति ननु सर्वेषामेव सन्निकर्षाणां द्रव्यादिग्राहकत्वे आत्मनः प्रत्यक्षानुपपत्तिः तत्र संयुक्त

स्वरूपत्वे द्वयोरक्राणितानित्वमतेप्यवशिष्टानीति भावः तत्सत्वे घटसत्वे उक्तयुक्तेरिति आधाराधेयभावानुपपत्तिरूपदूषणादि
त्यर्थः संप्रदायमते ऽस्वरसं दद्देवनव्यमतमाह नव्यास्त्विति अयमभावत्वेन प्रत्ययः बाधकाभावात् ममाप्ते बाधकाभावा
त् प्रमात्वे बाधकाभावात् अन्योन्याभावस्यत्वे शंकते स्यादेतदिति अत्यन्तत्वे घटभेदभिन्नत्वाभावे आद्ये घटभेदभिन्न
त्वे तद्वेदेति घटभेदभेदस्य भेदोपीत्यर्थः नवद्युक्तेति आधाराधेयभावानुपपत्तिरूपदूषणगणप्रसंगादित्यर्थः प्रामाणी
कत्वादिति वीजांकुरानवस्थायाइव प्रमाणसिद्धत्वादित्यर्थः संक्षेपइति घटभेदाभावो घटत्वस्वरूपइत्यादि बोध्यस
चायमिति प्रागुक्ताऽत्यन्ताऽतिरिक्तत्वेन सिद्धोऽभाव इत्यर्थः तत्रप्रथमोद्दिष्टमन्योन्याभावं लक्षयति तत्वेति प्रतीतिसा
क्षिकइति तादृशप्रतीतिसिद्धमखंडोपाधिरूपमन्योन्याभावत्वमेवान्योन्याभावलक्षणमित्यर्थः प्राचीनोक्तमन्योन्या
भावलक्षणं दर्शयितुं यदिदमाहुरित्यादिना तादात्म्येति घटतादात्म्येति घटत्वेन तथा च तथा च घटान्योन्याभावइतिल
क्षणसमन्वयः न च संयोगितादात्म्यं संयोगएवेति संयोगसंबंधावच्छिन्नप्रतियोगिताकसंयोग्यसंताभावेऽतिव्याप्तिरिति
वाच्यं तादात्म्यसामान्यसंबंधावच्छिन्नेतितदर्थात् तादात्म्यत्वविशिष्टत्वमेव हितादात्म्यसामान्यत्वे तादात्म्यत्वं।

तर्क
२६
29

चसंबंधेनाविशेषः प्रतीतिसाक्षिकः घटत्वादिरूपतादात्म्यत्वेनैव घटान्योन्याभावप्रतियोगितावच्छेदकमि
लक्षणसमन्वयः संयोगात्यंताभावे च संयोगत्वेनैव संबंधत्वे न तु तादात्म्यत्वेनेति नानुपपत्तिः ध्वंसप्रागभावयोरिवान्योन्या
भावस्य प्रतियोगितावच्छेदकसंबंधेनाभावाभावः न चात्यंताभावस्यापि तथास्त्विति वाच्यं संयोगसंबंधावच्छिन्नघटात्यं
ताभाववत्ताज्ञाने सत्यपि समवायादिसंबंधेन घटवत्ताज्ञानोदयात् संयोगसंबंधावच्छिन्नघटनिष्ठप्रकारताशालिज्ञा
ने प्रति संयोगसंबंधावच्छिन्नप्रतियोगिताकघटाभावप्रकारकज्ञानत्वेन प्रतिबंधकत्वात् अत्यंताभावस्य प्रतियोगिताव
च्छेदकसंबंधाव्यापकत्वादन्योन्याभावस्य च नाना संबंधावच्छिन्नप्रतियोगिताकत्वाभावेन समवायेन घटत्ववत्ताज्ञाने
प्रति घटान्योन्याभाववत्ताज्ञानत्वेनैव प्रतिबंधकतयान्योन्याभावस्य तथाभावव्यापकत्वादित्यखंडोपाधिरूपत्वमेव तस्य
सम्यगित्यस्वरसस्याहुरित्यनेन सूचितः तदन्य इति अन्योन्याभावान्यदित्यर्थः तथा चान्योन्याभावभिन्नाभावत्वं संस
र्गाभावत्वमिति तल्लक्षणमिति भावः अत्र यद्यपि नास्तीति प्रतीतिसाक्षिकोभावः संसर्गाभावः तदन्योन्योन्याभा
वः (तदन्यो) अन्योन्याभाववद्वृत्त्यपि कथमिवितं तथापि नास्तीति प्रतीतेरत्यंताभावत्वविषयकत्वेनैवोपपन्नेरतिरिक्तं २६

पत्रे ३०